भगवंतभास्करे
मीमांसकश्रीनीलकण्ठभट्टविरचितः

नीतिमयूखः

(पञ्चमः)

आकेइत्युपाह्वमहादेवशर्मणा लेलेइत्युपाह्वव्यंकटेशशास्त्रिणा च
संशोधितः ।

मुम्बय्यां
फोर्ट सर्केलाख्ये प्रविभागेऽष्टमसंख्याके सासूनभवने
' मणिलाल इच्छाराम देसाई ' इत्यनेन स्वीये ' गुजराती '
मुद्रणयन्त्रालये मुद्रयित्वा तत्रैव प्रकाशितः ।

विक्रमसंवत् १९७७.   खिस्ताब्दः १९२१.

मूल्यं सपादरूपकः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ नीतिमयूखस्थविषयाणामनुक्रमः

विषयः	पृ.
मंगलाचरणम्	१
राजशब्दार्थः	,,
अभिषिक्तस्य प्रजापालनधर्मः	,,
अभिषेककालः	२
अभिषेकविधिः	,,
अभिषेकप्रयोगः	८
पूर्वोक्ताः शर्मवर्मादिगणाः ...	२०
पूर्वोक्ता अशीत्युत्तरशतश्लोकाः	३४
राज्यसप्ताङ्गानि	४२
तत्र स्वामिनिरूपणं	,,
अष्टादश व्यसनानि तत्र कष्टतमानि	४८
मद्ये दोषाधिक्यम्	,,
द्यूते दोषाः	४९
मृगयादोषाः	,,
गुणेषु केषांचिद्व्यवस्था ...	५०
अन्येपि राज्ञो गुणाः... ...	,,
राजकृत्यम्	५१
दंतधावनत्यागे परीक्षा ...	,,
श्मश्रुकर्मणि विशेषः... ...	,,
ततः कृत्यम्...	,,
ततः सभां प्रविशेत्	५२
सभाप्रवेशनानंतरं	,,
तत्र दंड्यान्दंडयेत्	,,
अष्टविधं कर्म प्रचेता आह ...	५४
ततो भोजनम्	,,
भोजनसमये विषपरिक्षार्थं पक्षिणः स्थाप्याः ...	,,

विषय.	पृ०
विषदायिनां लक्षणं	५५
भोजनोत्तरकृत्यम्	५६
खड्गलक्षणम्	,,
मृगया	५७
सायंकृत्यम्	५९
विविक्ते मंत्रं कुर्यात्	,,
राजसेवकानां लक्षणं	६०
स्वामिकृत्यम्	६२
संधिनिरूपणम्	६३
विग्रहः	६४
यानम्	६५
आसनम्	६६
द्वैधीभावः	,,
आश्रयः	,,
अरिमित्रोदासीनलक्षणानि ...	६७
भवनशोधनम्	६८
स्त्रीणां चरितम्	६९
भार्यागमनम्	,,
अमात्यस्तत्र पुत्रोप्यमात्यमध्ये परिगणितः	७०
राजपुत्रस्य कृत्यं	,,
राजपुत्राणां यत्नतो रक्षणम् ...	७१
अमात्यस्त्रिविधः	७२
तेषां संख्या...	,,
सुहृदः	७३
कोशः	७४
राष्ट्रम्	७५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषय.	पृ.
दुर्गकरणार्थे भूमिः	७७
बलम्	७९
बलं षड्विधम्	८०
गजनिरूपणं...	८१
तत्परिमाणम्	८२
भद्रादिसंज्ञाः	,,
तत्प्राशस्त्यं	,,
बंधनभूमिः	८४
शालाः	,,
स्तंभानां परिणाहः	,,
द्वारम्	,,
बंधनार्थे वृक्षाः	८५
बंधने दिशः...	,,
अश्वलक्षणम्	८६
हेषितपरीक्षा	८७
अभियोज्यनृपाः	,,
दूतप्रेषणम्	८९
चराः	९०
प्रयाणे योधस्वरूपं	९१
दर्शनशकुनम्	९२
अनिष्टफलानि	,,
देशविशेषे विशेषः	९३
अप्राणिशकुनम्	९४
स्कंधावारस्थलं	९५
सेनापतिलक्षणं	९७
सेनापतिकृत्यम्	,,
व्यूहभेदाः	,,
व्यूहरचना	९८
कूटयुद्धेन शत्रुमारणम् ...	,,
अत्र ब्राह्मणहननविचारः ...	९९
विशेषः	,,
धर्मरणम्	१००
योधान्प्रत्युपदेशः	,,
रणे मरणस्य फलं	१०२
पलायने दोषः	१०५
रणेऽवध्याः	,,
रणे दानम्	१०६
वीरोत्साहगर्भो निंदापरिहारः	,,
क्रीडा	१०८

इति विषयानुक्रमः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीतिमयूखः ।

पञ्चमः ५

श्रीगणेशाय नमः ॥

देवर्षिरक्षःसंघानामवाङ्मनसगोचरम् ।
प्रत्यक्षमपि तद्धाम सर्वदा समुपास्महे ॥ १ ॥
विरोधिमार्गद्वयदर्शनार्थं द्वेधा बभूवात्र परः पुमान्यः ।
श्रीशंकरोऽभट्ट इहैकरूपो मीमांसकाद्वैतमुरीचकार ॥ २ ॥
पितृसौहित्यसंसिद्धिहेतुमुक्त्वाथ तत्सुतः ।
नीलकण्ठः प्रकुरुते राजनीतिं नृपादृताम् ॥ ३ ॥

तत्र राजशब्दः क्षत्रियमात्रे शक्तो न राज्ययोगिनि । अभिषेकोत्तरभाविराज्ययोगात्प्रागपि राजानमभिषिञ्चेदित्यादेः शास्त्रीयप्रयोगस्य क्षत्रियमात्रेऽपि सद्भावादिति निरणाय्यवेष्ट्यधिकरणे । तस्य च विधिवदभिषिक्तस्य प्रजापालनं धर्म इत्याह मनुः—

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ॥

ब्राह्मसंस्कारो ब्राह्मणैः कृतोऽभिषेकः । अभिषेकविधिश्च विष्णुधर्मोत्तरे—

इति संभृतसंभारो राज्ञः सांवत्सरस्ततः ।
कालेऽभिषेचनं कुर्यात्तं कालं कथयामि ते ॥

सांवत्सरो ज्योतिर्वित् ।

मृते राज्ञि न कालस्य नियमोऽत्र विधीयते ।
तत्रास्य स्नपनं कार्यं विधिवत्तिलसर्षपैः ॥
घोषयित्वा जयं चास्य सांवत्सरपुरोहितौ ।
अन्यासनोपविष्टस्य दर्शयेतां जनं शनैः ॥
स सांत्वयित्वा तु जनं मुक्त्वा बन्धनगांस्ततः ।
अभयं घोषयित्वा तु कालाकांक्षी ततो भवेत् ॥

अत्र यदा पूर्वराजनि मृतेऽन्योऽभिषिच्यते तदासौ तिलसर्षपस्नानाद्यभयघोषान्तेकृतेऽन्यासनस्थः प्रजाः पालयन्नभिषेककालमाकांक्षेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राप्तकाले चात्मानमभिषेचयेत्। यदा तु पूर्वराजनि जीवत्येव कारणान्तरादन्योऽभिषिच्यते तदा कालप्रतीक्षान्तमकृत्वा काल एवाभिषेकः कार्यः। तमेव कालमाह—

नाभिषेच्यो नृपश्चैत्रे नाधिमासे च भार्गव।
न प्रसुप्ते तथा विष्णौ विशेषात्प्रावृषि द्विज॥

प्रावृषो विशेषतो निषेधोऽगतौ तद्भिन्नविष्णुशयनकालाभ्यनुज्ञानार्थः।

न च भौमदिने राम चतुर्थ्यां च तथैव च।
नवम्यां नाभिषेक्तव्यश्चतुर्दश्यां च भार्गव॥
ध्रुवाणि वैष्णवं शाक्रं दास्रपुष्यौ तथैव च।
नक्षत्राणि प्रशस्यन्ते भूमिपालाभिषेचने॥

वैष्णवं श्रवणः। शाक्रं ज्येष्ठा। दास्रमश्विनी।

कार्या पौरंदरी शान्तिः प्रागेवास्य पुरोधसा।

पौरंदरी ऐन्द्री सा च वक्ष्यते।

प्राप्तेऽभिषेकदिवसे सोपवासः पुरोहितः।
सितमाल्योपवीतश्च सर्वाभरणभूषितः॥
वेदिमुल्लिख्य मन्त्रेण हुत्वा च विधिवत्ततः।
शर्मवर्मगणं चैव तथा स्वस्त्ययनं गणम्॥
आयुष्यमभयं चैव तथैव चापराजितम्।

एते पञ्चगणा अग्रे वक्ष्यन्ते।

संपातवन्तं कलशं तथा कुर्याच्च काञ्चनम्।
वह्नेर्दक्षिणपार्श्वस्थः श्वेतचन्दनभूषितः॥
श्वेतानुलेपनः स्रग्वी सर्वाभरणभूषितः।
आसनस्थः सुखं पश्येन्निमित्तानि हुताशने॥
पश्येयुरन्ये च तथा नृसिंहा
दैवज्ञवाक्यंनिपुणं च भूयः।
सांवत्सरस्याथ सदस्यमुख्यः
सदस्यमुख्यस्य पुरोहितश्च॥
प्रदक्षिणावर्तशिखस्तदा जाम्बूनदप्रभः।
रथौघमेघनिर्घोषो विधूमश्च हुताशनः॥
अनुलोमः सुगन्धश्च स्वस्तिकाकारसन्निभः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्द्धमानाकृतिश्चैव नन्द्यावर्तनिभस्तथा ॥

स्वस्तिकवर्द्धमाननन्द्यावर्ता राजगृहभेदाः ।

प्रसन्नार्चिर्महाज्वालः स्फुलिङ्गरहितो हि सः ।
स्वाहावसाने ज्वलनः स्वयं देवमुखं हविः ॥
यदा भुङ्क्ते महाभाग तदा राज्ञो हितं वदेत् ।
हविषश्च यदा वह्नौ न स्याच्छिमिशिमायितम् ॥

शब्दानुकरणमात्रमेतत् ।

न व्रजेयुश्च मध्येन मार्जारमृगपक्षिणः ।
पिपीलिकाश्च धर्मज्ञ तदा कुर्याज्जयं नृपे ॥
अङ्गहारादिलाभे तु वह्ने राज्ञो जयं वदेत् ।
तथैव च जयं ब्रूयात्प्रस्तरस्याप्यदहिनि ॥
स्नानं समारभेद्राज्ञो होमकाले पुरोहितः ।
आदौ तु स्वेच्छया स्नातः पुनर्ऋग्भिः समारभेत् ॥

ऋचः प्रयोगे वक्ष्यन्ते । पुनर्मृद्भिरिति क्वचित्पाठः ।

पर्वताग्रमृदा तावन्मूर्द्धानं शोधयेन्नृपः ।
वल्मीकाग्रमृदा कर्णौ वदनं केशवालयात् ॥
इन्द्रालयमृदा ग्रीवां हृदयं तु नृपाजिरात् ।
करिदन्तोद्धृतमृदा दक्षिणं तु तथा भुजम् ॥
सरोमृदा तथा पृष्ठमुदरं संगमान्मृदा ।
नदीकूलद्वयमृदा पार्श्वौ संशोधयेत्तथा ॥
वेश्याद्वारमृदा राज्ञः कटिशौचं विधीयते ।
गजस्थानात्तथैवोरू गोस्थानाज्जानुनी तथा ॥
अश्वस्थानात्तथा जङ्घे राज्ञः संशोधयेद्बुधः ।
रथचक्रोद्धृतमृदा तथैव चरणद्वयम् ॥

तथैव च करद्वयमिति क्वचित्पाठः ।

मृत्पूतः स्नपनीयः स्यात्पञ्चगव्यजलेन तु ।
ततो भद्रासनगतं मुख्यामात्यचतुष्टयम् ॥
बलप्रधानं भूपालमभिषिञ्चेद्यथाविधि ।
पूर्वतो हेमकुम्भेन घृतपूर्णेन वाडवः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाडवो विप्रः।

दक्षिणे क्षीरपूर्णेन रौप्यकुम्भेन क्षत्रियः।
दध्ना च ताम्रकुम्भेन वैश्यः पश्चिमतो द्विज ॥
माहेयेन जलेनोदक्शूद्रामात्योऽभिषेचयेत् ॥

माहेयं गोशृङ्गपुच्छसंबन्धि।

ततोऽभिषेकं नृपतेर्बह्वृचप्रवरो द्विजः।
कौबेर्यां मधुना राम छन्दोगोऽथ कुशोदकैः ॥
संपातवन्तं कलशं तथाहृत्य पुरोहितः।
विधाय वह्निरक्षां तु सदस्येषु यथाविधि ॥

वह्निं रक्षध्वमिति प्रेष्येत्यर्थः।

राजसूयाभिषेके तु ये मन्त्राः परिकीर्तिताः।
तैस्तु दद्यान्महाभाग ब्राह्मणानां स्वरेण तु ॥

ते च मन्त्राः प्रयोगे ज्ञेयाः।

ततः पुरोहितो गच्छेद्वेदिमूलं तदैव तु।
विभूषितं तु राजानं संस्थितं भद्र आसने ॥

भद्रासनलक्षणं देवीपुराणे—

हैमं च राजतं ताम्रं क्षीरिवृक्षमयं च वा।
भद्रासनं च कर्तव्यं सार्द्धहस्तसमुच्छ्रितम् ॥
सपादहस्तमानं च राज्ञो माण्डलिकान्तरात् ॥

वराहसंहितायाम्—

त्रिविधस्तस्योच्छ्रायो हस्तः पादाधिकोर्द्धयुक्तश्च।
माण्डलिकानन्तरजित्समस्तराज्यार्थिनां शुभदः ॥

विष्णुधर्मोत्तरे—

शतच्छिद्रेण पात्रेण सौवर्णेन यथाविधि।
अभिषिञ्चेत धर्मज्ञः सम्यग्वेदविशारदः ॥
या ओषधीरोषधिभिः श्रुताभिः सुसमाहितः।
रथेतिष्ठेति गन्धैश्च आब्रह्मन्ब्राह्मणेति च ॥
बीजैः पुष्पैस्तथा सीमं(?) राम पुष्पवतीति च।
तेनैव चैव मन्त्रेण फलैस्तमभिषेचयेत् ॥
आशुःशिशान इत्येवं सर्वरत्नैश्च भार्गव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ये देवाःपुरःसदेति कुशाद्भिः परिमार्जयेत् ॥
ऋग्वेदवित्ततो राज्ञो रोचनया यथाविधि।
मूर्द्धानं च तथा कण्ठं गन्धद्वारेति संस्पृशेत् ॥
ततो ब्राह्मणमुख्याश्च क्षत्रियाश्च विशस्तथा।
शूद्राश्चावरमुख्याश्च नानातीर्थसमुद्भवैः ॥
नादेयैः सारसैः कौपैर्नानाकलशसंस्थितैः।
चतुःसागरजैर्लाभादलाभे द्विजकल्पितैः ॥
गङ्गायमुनयोश्चैव निर्झरैश्च तथाद्रिजैः।
छत्रपाणिर्भवेत्कश्चिकेचिच्चामरपाणयः ॥
अमात्यमुख्यास्तत्कालं केचिद्वेत्रधरास्तथा।
शंखभेरीनिनादेन बन्दिनां निःस्वनेन च ॥
गीतवादित्रघोषेण द्विजकोलाहलेन च।
राजानमभिषिञ्चेयुः समेत्य सहिता जनाः ॥
सर्वलोकाभिषिक्तस्य संमिश्रजलसंयुतम्।
सर्वौषधियुतं पुण्यं सर्वगन्धयुतं तथा ॥
रत्नबीजसमायुक्तं फलपुष्पसमन्वितम्।
पूजितं सितसूत्रेण वेष्टितग्रीवमेव च ॥
श्वेतवस्त्रावकीर्तैश्च संवीतं शुचिभूषितम्।

वस्त्रावकर्तैश्चेति क्वचित्पाठः। बिल्वपत्रकुन्दादिपुष्पकमलाद्याकारतया कर्तितवस्त्रैरिति तदर्थः।

क्षीरवृक्षलताच्छन्नं सुदृढं काञ्चनं नवम्।
आदाय कलशं राज्ञः स्वयं सांवत्सरस्तदा।
मन्त्रावसाने कलशं दद्याद्भृगुकुलोद्वह ॥

मन्त्रा अशीत्युत्तरं शतं वक्ष्यन्ते सुरास्त्वामित्याद्याः। दद्यादभिषिञ्चेत्।

ततः पश्येन्मुखं राजा दर्पणे वाथ सर्पिषि।
सोष्णीषः सितवस्त्रश्च मङ्गलालम्भनं ततः ॥
ततः संपूजयेद्विष्णुं ब्राह्मणांश्च समर्चयेत्।
राजा द्वौ चार्चयेत्तत्र सांवत्सरपुरोहितौ ॥
मधुपर्केण धर्मज्ञस्ततस्तस्य स दैववित्।
पट्टबन्धं प्रकुर्वीत ततस्तस्य च बन्धनम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पट्टलक्षणं तु देवीपुराणे—

सर्वस्नानमलंकारं रोचनाख्यं च पट्टकम् ॥
वृद्धयाद्व्यङ्गुलमङ्गुल्याऽऽषट्त्रिंशदङ्गुलावधि।
वृत्तं वा चतुरस्रं वा पद्मकत्रिकगर्भितम् ॥
वत्सेशपद्ममत्स्येभगोस्वस्तिकविनायकैः।
श्रीश्रीवृक्षवराहेण स्वामिदेवीशुभान्वितम् ॥

अद्व्यङ्गुलं सप्तांगुलमेकांगुल्यासहितमष्टांगुलमित्यर्थः तत आषट्त्रिंशदंगुलं सप्तसप्तांगुलवृद्धिर्वा तेनाष्टौ पञ्चदश द्वाविंशतिरेकोनत्रिंशत्षट्त्रिंशद्वाङ्गुलानि दैर्घ्यं, दैर्घ्यार्द्धेन मध्ये विस्तारः तदर्द्धेनान्तयोः स च वृत्तायश्चतुरस्रायतो वा। पद्मत्रिकं पद्मत्रयम्। वत्सः श्रीवत्सः। ईशः शिवः इभगौर्वृषदेहं गजमुखम्। वराहेभेऽप्येवम्। केवलयोर्गजवृषयोर्विश्वकर्मणा निषेधात्। वाराह्यामपि मध्यविस्तारमुक्त्वा—

सर्वे द्विगुणायामा मध्यादर्द्धेन पार्श्वविस्ताराः।
सर्वे विशुद्धकाञ्चनविनिर्मिताः श्रेयसो वृद्ध्यै ॥
पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजराजमहिष्योः।
एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया ॥

विश्वकर्मापि—

व्याघ्रव्यालगजाः सिंहा अश्वोष्ट्रौ महिषो वृषः।
भूषणेषु त्यजेदष्टौ यदीच्छेद्दीर्घजीवितम् ॥
वनेचरा जलचराः कृमिकीटपतङ्गकाः।
न तानाभरणे कुर्याद्यदीच्छेज्जीवितं चिरम् ॥

एवं पट्टबन्धानन्तरं कार्यमुक्तं विष्णुधर्मोत्तरे—

ततः स बद्धमुकुटः काले पूर्वं मयोदिते।
पराध्यास्तरणोपेते मञ्चे बद्धोत्तरच्छदे।
ध्रुवाद्यौरिति मन्त्रेण सोपवेश्यः पुरोधसा।
वृषस्य वृषदंशस्य द्वीपिनश्च भृगूद्वह।
तेषामुपरि सिंहस्य व्याघ्रस्य च ततः परम् ॥

वृषदंशो मार्जारः द्वीपी द्वीपांतरगतो व्याघ्र इति तातचरणाः। तरक्षुरिति केचित्।

तत्रोपविष्टस्य तदा प्रतीहारः प्रदर्शयेत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमात्यांश्च ततः पौरान्नैगमांश्चापणेश्वरान् ॥
तथा प्रकृतयश्चान्या यथावदनुपूर्वशः ।
ततोऽग्रहारवस्त्रेभतुरङ्गकनकोत्तमैः ॥
गोजाविगृहदानैश्च सांवत्सरपुरोहितौ ।
पूजयित्वा ततः पश्चात्पूजयेद्ब्राह्मणत्रयम् ॥
अनेनैव विधानेन येन राजाभिषेचितः ।
ततः सदस्यान्संपूज्य सांवत्सरपुरोधसः ॥
ततो ब्राह्मणमुख्यानां पूजनं तु समाचरेत् ।
गोवस्त्रतिलरूप्यान्नफलकाञ्चनगोरसैः ॥
मोदकैः श्वेतपुष्पैश्च महादानैश्च पार्थिवः ।
मङ्गलालंभनं कृत्वा गृहीत्वा सशरं धनुः ॥
वह्निं प्रदक्षिणीकृत्य प्रणिपत्य तथा गुरून् ।
पृष्ठतो वृषमालभ्य गां सवत्सां च पार्थिवः ॥
पूजयित्वा तु तुरगं मन्त्रितं चाभिषेचितम् ।
तमारुह्य ततो नागं पूजयेच्चाभिषेचितम् ॥
मन्त्रितं दक्षिणे कर्णे स्वयं दैवविदा ततः ।
आरुह्य राजमार्गेण स्वपुरं तु परिभ्रमेत् ॥
मुख्यामात्यैः ससामन्तैः सांवत्सरपुरोहितैः ।
सहितः कुञ्जरारूढैरभिगच्छेच्च देवताः ॥
तासां संपूजनं कृत्वा नगरं याति वेष्टितः ।
प्रविश्यान्तर्गृहं राजा प्रहृष्टनरवाहनः ॥
दानमानादिसत्कारैर्गृह्णीयात्प्रकृतीस्ततः ।
संपूजितास्ताश्च विसर्जयित्वा
गृहे स्वके स्यान्मुदितो महात्मा ।
विधानमेतत्समवाप्य राजा
कृत्स्नां तु धात्रीं वशगां विदध्यात् ॥ इति ।

संक्षेपस्तु गोपथब्राह्मणे—अथ राज्ञोऽभिषेकविधिं व्याख्यास्यामो बिल्वप्रभृतीन्संभारान्संभृत्य षोडश कलशान् षोडश बिल्वानि वल्मीकस्य च मृत्तिकां सर्वान्नं सर्वरसान्सर्वबीजानि, तत्र चत्वारः सौवर्णाश्चत्वारो राजताश्चत्वारस्ताम्राश्चत्वारो मृन्मयास्तान् ह्रदे सरसि वोर्ध्वस्रुतो नामै-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाम इत्युदकेन पूरयित्वा, वेदिपृष्ठे संस्थाप्य, कुंभे विल्वमेकैकं दद्यात्सर्वान्नं सर्वरसान्सर्वबीजानि च प्रक्षिप्योभयैरपराजितैरायुष्यैः स्वस्त्ययनैः सौवर्णेषु संपातान्संश्राव्यैः संसिक्तीयैश्च राजतेषु भेषज्यैरंहोमुचैस्ताम्रेषु संवेशसंवर्ग्याभ्यां तातीयैः प्राणसूक्तेन च मृन्मयेषु, ततस्तान् कलशान् गृहीत्वा स्रौत्रियैः पवित्रियैरभिष्टुयै राजानमभिषिञ्चेत्। भूमिमिन्द्रियं च वर्द्धय क्षत्रियं म इति सिंहासनमारूढमभिमन्त्रयेत्। एवमभिषिक्तस्तु रसान्प्राश्नीयाद्विप्रेभ्यश्च दद्याद्गोसहस्रं सदस्येभ्यः कर्त्रे ग्रामवरं विपुलं यशः प्राप्नोति भुङ्क्ते धरां जितशत्रुः सदा भवेदिति । अन्नं तण्डुलादि यदुप्तं न प्ररोहति। बीजं प्ररोहार्हं व्रीह्यादि । ऊर्ध्वं स्रुत् मुखं येषां ते ऊर्ध्वस्रुतः । नामैनाम अभयापराजिताद्या मन्त्राः प्रयोगे वक्ष्यन्ते । अत्र बहुवचने त्रयस्त्रयो ग्राह्याः कपिञ्जलन्यायात् । संवर्तसंवेशप्राणसूक्तेष्वेकैक एवेति तातचरणाः ।

अथ प्रयोगः ।

तत्र यदा पूर्वराजनि मृतेऽन्योऽभिषिच्यते तदा सांवत्सरपुरोहितौ तं नित्यस्नानप्रकारेण तिलसर्षपैः संस्नाप्य राष्ट्रेऽयं राजेति तस्य जयमुद्घोष्य पूर्वराजासनादा सनान्तर उपवेश्य मन्त्र्यादिकं नगरजनांश्च दर्शयेताम्। राजा च तान्सत्कृत्य कारागृहनिगडबद्धान् मुक्त्वाऽभयं दत्त्वा तदासनस्थ एव राज्यं कुर्वन्कालं प्रतीक्षेत। प्राप्ते चाभिषेककाले आत्मानमभिषेचयेत्। पूर्वस्मिन्राजनि जीवति कारणान्तरेणान्याभिषेके तु न कालप्रतीक्षान्तोविधिः । किन्त्वभिषेककालेऽभिषेक एव। अभिषेकदिनात्पूर्वमेव कस्मिंश्चिच्छुभदिने पुरोधा ऐन्द्रीं शान्तिं कुर्यात्। सा चैवम् ।

अथैन्द्री शांतिः ।

पुरोधाः सुदिने मासपक्षाद्युल्लिख्य करिष्यमाणराज्याभिषेकाङ्गतया ऐन्द्रीं शान्तिं करिष्य इति संकल्प्य गणेशपूजास्वस्तिवाचनर्त्विग्वरणानि कुण्डलाङ्गुलीयकवासआदिभिस्तत्पूजां च कुर्यात् । ततः अन्यसश्च न्यवसश्च विलंबिष्यामि मायया । ताभ्यामुद्धृत्य वेदमथ कर्माणि कृण्महे. । प्रयच्छ परशुं त्वरया हरौषमहिषत इति दात्रं गृह्णाति। ओषधादातुपर्वमिति मूलादुपरि बर्हिर्लुनाति । ॐग्रीष्मस्ते भूमेवर्षाणि शरद्धेमन्तः शिशिरो वसन्तः । ऋतवस्त विहिता हायनीरहोरात्रे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पृथिवी नो दुहानमिति भ्रुवमुपस्थाय । विमिष्वपयस्वतीं घृताचीं देवान्यं धेनुरपस्पृगेषा । इन्द्रः सोमे पितुरक्षेमो आग्निः प्रस्तौतु विमृधो नुदस्वेति द्वादशांगुलां शमीसमिधमनुमन्त्रयते । अथ वेदिः। सा च । षट्समिदायता पूर्वपश्चिमयोः । पश्चिमदिशि चतुःसमिद्विस्तारा पूर्वपश्चिमयोः प्रत्येकं समिद्वयं त्यक्त्वा मध्यभागे दक्षिणोत्तरयोः प्रत्येकमर्द्धसमित्त्यागेन समित्त्रयविस्ताराग्रे संनमनक्रमेण सार्द्धसमित्त्रयविस्तारा। तन्मध्ये पश्चिमतः समित्त्रयं पूर्वतः समिन्मात्रं त्यक्त्वा समिद्वयचतुरस्रा उत्तरवेदिः सा च कुण्डात्मिका स्थण्डिलात्मिका वा उत्तरवेदितः प्राच्या दक्षिणोत्तरयोश्च वेदितोर्द्धसमिन्मितैव भूमिस्तिष्ठति। तत ईशानकोणात्प्रदक्षिणक्रमेण वालुकया तूष्णीं महावेदिसामरेखां(?) कुर्यात् । ततः ॐवृहस्पते परिगृहाण वेदिं सुगावो देवाः सदनानि सन्तु । अस्यां वर्हिः प्रथतां साध्वन्तरहिंस्राणः पृथिवी देवी देव्यस्तु । इति रेखां त्रिरनुमन्त्रयेत् । ततः प्रथमं महावेदिमध्ये श्रीधास्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः । ऋतवस्ते विहायनीरहोरात्रे पृथवि नो दुहाना । यत्ते भूमे विखनामि क्षिप्रं तदपि रोहन्तु । माते मर्म विमृग्वरिमाते हृदयमर्प्पिषम् " इतिभूमिखननम् । ततः ॐयत्त ऊनं तत्त आपूरयाति प्रजापतिः प्रथमजा ऋतस्येति खनितपूरणम् । ततः ॐत्वमस्या वपनी जनानामदितिः कामदुघा पप्रथानेति वालुकाभिर्महावेदिं पूरयति । पुनः कुण्डात्मिकां स्थण्डिलात्मिकां वोत्तरवेदिं परिमाय पूर्ववद्रेखां कृत्वा बृहस्पते परिगृहाणेति मन्त्रेण त्रीन्वारान्संस्पृश्य पूर्ववदनुमन्त्रयेत् ततः असंवाधं बध्यतो मानवानां यस्या उद्वतः प्रवंतः समं वहुनानावीर्याओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः । इत्युत्तरवेद्यां वालुकां विस्तारयति । ततो यस्याश्चतस्रः प्रदिशः पृथिव्यां यस्यामन्नं कृष्टयः संबभूवुः । या बिभर्ति बहुधा प्राणदेजत्सा नो भूमिर्गोष्ठिऽप्यन्ये दधात्विति वालुकाभिर्वेदिं चतुरस्रां करोति । ततो देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिखा परिगृह्णामीत्यनेन लेखनीं गृह्णाति । ततः इन्द्रः सीतां निगृह्णातु तां पूषाभिरक्षतु । सा नः पयस्वती दुहामुत्तरामुत्तरासमामित्युत्तरवेद्यां आग्नेयकोणादारभ्य वामावर्तेन चतुर्दिक्षु लेखाः कृत्वा पुनरप्याग्नेयकोणादारभ्य ईशानकोणपर्यन्तं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वंत उल्लिख्य तन्मध्येऽपि पूर्वाग्रास्तिस्रो लेखाः करोति । अथ तस्यां व्रीहियवौ तूष्णीं विकीर्य वेषेण भूमिः पृथिवी वृता वृतासानो दधातु भद्रया श्रिये धामनि इत्यनेन संप्रोक्ष्य । ॐयस्यामन्नं व्रीहियवौ यस्या इमा पञ्चकृष्टयः । भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेधसे इति भुवं नत्वा । ॐत्वामग्ने भृगवो निषत्तामाङ्गिरसःसदनश्रेय एव हि । विश्वकर्मा पुर एतु प्रजानं धिष्ण्यं पन्थानमनुतेतिदिशास्ते भद्रं पन्था मनुते दिशामःश्रेयंपन्था मनुते दिशामः स्वस्ति पन्था मनुते दिशाम इत्यग्निसंनिधापनम् । ततो भद्रा भव श्रेयो भव स्वस्त्यो भवेति व्रीहियवौ कांस्यादिपात्रस्थ एवाग्नौ प्रक्षिप्य ॐ विश्वंभरा वसुधीनी प्रतिष्ठाहिरवक्षा जगतो निवेशनी । वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभाद्रविणे नो दधात्वित्युत्तरवेद्यामग्निं स्थापयति । ममाग्ने वर्चो विहवेष्वस्तु वयंत्वेन्धानास्तन्वं पुषेम । मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेमेति समित्त्रयं जुहुयात् । एवं व्रतग्रहणान्तं कृत्वा तेन त्वा व्रतपत इत्येकां समिधं स्वाहाकारवर्जं हुत्वाग्नेरीशानभागे सौवर्णं रौप्यं ताम्रं वा जलपूर्णं गन्धसर्वौषधिदूर्वापञ्चपल्लवपञ्चत्वक्पञ्चगव्यपञ्चामृतसप्तमृत्तिकापुष्पफलपञ्चरत्नसुवर्णशकलवासोयुतं कलशमक्षतेषु संस्थाप्य तदुपरि अग्नेः पुरस्ताद्गोचर्ममात्रं गोमयेनोपलिप्य तदहतेनोदग्दशेन वाससा संछाद्य तदुपर्यष्टदलं पद्ममालिख्य तत्र वा पलतदर्द्धतदर्द्धसुवर्णनिर्मितमिन्द्रं संस्थाप्य राजोपचारैः पूजयेत् । तत्रेमा आप इति स्नानम् । मधुपर्ककुण्डलाङ्गुलीयकाद्याभरणच्छत्रचामरध्वजपताकादीन्यर्पयेत् । त्रातारमिन्द्रमिति पुष्पाञ्जलिः । ततस्तूष्णीं पवित्रे कृत्वा विष्णोर्मनसा पूतेस्थ इति प्रथमं पवित्राभ्यामिध्मप्रोक्षणं विष्णोर्मनसा पूतमसीति द्वितीयम् । देवस्त्वा सवितोत्पुनात्वछिद्रेण त्वा पवित्रेण शतधारेण सहस्रधारेण सुतोत्पुनामीति तृतीयम् । चतुर्थं तूष्णीम् । अग्नये त्वा जुष्टं प्रोक्षामीत्यनेनेध्मसंनिधापनम् । अथेध्ममादाय ॐअग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु । अग्निरन्तःपुरुषेषु गोष्वश्वेष्वग्नयः । १ । अग्निर्दिव्य आपतत्यग्ने देवस्योर्वन्तरिक्षम् । अग्निमर्त्तासइन्धते हव्यवाहं घृतप्रियम् ॥ २ ॥ अग्निवासाः पृथिव्यसि तज्ज्ञौस्त्विषीमन्तं संशितमाकृणोतु । भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतम् ॥ भूम्यां मनुष्या जीवन्ति स्वययात्रेन मर्त्या । सा नौ भूमिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राणमायुर्दधातु जरदष्टिं पृथिवीमाकृणोतु ॥ ३ ॥ एतमिधां समाहितं जुषाणो अग्ने प्रतिहर्य होमैः। तस्मिन्विधेम सुमतिं स्वस्ति प्रजां चक्षुः पशून् समिद्धे जातवेदसि ब्रह्मणः ॥ ४ ॥ अस्मै क्षत्राणि धारयान्तमग्ने युनज्मि त्वा ब्रह्मणत्वादैव्येन । दीदिह्यस्मभ्यं द्रविणेह भद्रं प्रेमं वोचो हविर्दां देवतासु ॥ ५ ॥ एभिः पञ्चभिमन्त्रैर्जुहोति। ततः त्वं भूमिमन्वेष्योजसा त्वं वेद्यां सीदसि चारुरध्वरे । त्वां पवित्रमृषयो भरतस्त्वं पुनीहि दुरितान्यस्मिन्निति बर्हिःप्रोक्षणम्। ततः ऋषीणां प्रस्तरोसि नमोस्तु दैवाय प्रस्तरायेति दक्षिणतो ब्रह्मासनं निदधाति। ततोऽस्मिन्कर्मणि त्वं भूपते भुवनपते भुवांपते महतोभूतस्यपते ब्रह्माणं त्वां वृणीमहे। इति वरणमन्त्रं ब्रह्माणमुद्दिश्य कर्त्ता पठति। ततः अहं भूपतिरहं भुवनपतिरहं भुवां पतिरहं महतो भूतस्य पतिस्तदहं मनसे प्रब्रवीमि मनो वाचे वाग्गायत्री गायत्र्युष्णिह उष्णिगनुष्टुभे अनुष्टुब्बृहत्यै वृहतीपंक्तयेपंक्तिस्त्रिष्टुभे त्रिष्टुब्जगत्यै जगती प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः ॐभूर्भुवः स्वर्जनदों इति ब्रह्मा जपति। ततः ॐ अहेदैधिषव्योदतस्तिष्ठान्यस्यसदनेसीदयोस्मत्पाकतरइति ब्रह्मा स्वासनमन्वीक्षते। ॐनिरस्तः परा वसुः सह पाप्मना निरस्तः सोस्तुयोस्मान् द्वेष्टि यं च वयं द्विष्मः इति ब्रह्मासनाद्दक्षिणे तृणं निरस्यति। अथासनमालभ्य जपति। इदमहमर्वावसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामीष्टस्य सदने सीदामि पूर्त्तस्य सदने सीदामि मामृषदेववर्हिःस्वासस्थं त्वाध्यासदेयं तूर्णमृदमनभिशोकम्। विमृग्वरीं पृथिवीमावदामि क्षमां भूमिं ब्रह्मणा वावृधानाम्। उर्ज्जं पुष्टिं बिभ्रतीमन्नभागं घृतं त्वाभिनिषीदेवभूमे। अथोपविश्यासने ब्रह्मा जपति। वृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते वृहस्पते यज्ञं गोपाय। ततः यउद्रुत उत्रीवतः शकेथं यातमं द्यावापृथिवीद्यान इति द्यावापृथिव्यौ समीक्षतम्। अथ होता बर्हिर्मुष्टिमादाय स्तृणाति त्रीन्वारानाग्नेये त्रीन् दक्षिणतः त्रीन्पश्चिमायां सकलांस्त्रीन् वायव्ये पूर्वतो मूलानि छादयंस्त्रीनुत्तरतस्त्रीनीशाने यत्र समागच्छति तद्दक्षिणोत्तरं करोति। इति भाष्यम्। ब्रह्मा चोपरि देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा परिस्तृणामि इति पठित्वा आग्नेयकोणादीशानपर्यन्तं पंक्तित्रयं पूर्वाग्रान् दर्भानास्तृणाति। एवं प्रथमास्तृतदर्भा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्राच्छादितमूलानुत्तरतो दर्भानास्तीर्य निर्ऋतिकोणादारभ्य पूर्ववत्पंक्तित्रयेण प्रागग्राताग्नेयपर्यन्तं(?)। तथैव निर्ऋतिकोणादारभ्य वायव्यपर्यन्तं तथैव वायव्यकोणादारभ्य प्रागैशानपर्यन्तं परिस्तीर्य चरममीशानपरिस्तीर्णदर्भाग्रान् प्रथमत ईशानपरिस्तृतदर्भाग्राणामधः स्थापयेत् । ततः हविषा त्वा जुष्टं प्रोक्षामीत्यनेनास्तीर्णदर्भाभ्युक्षणम् । अथ होता आस्तीर्णदर्भमध्ये कांश्चिद्दर्भानादाय तान्स्वासने समास्तीर्य अहेदैधिषव्य इत्यनेन स्वासनमन्वीक्षते । निरस्त इत्यादिना तृणं निरस्यति आसनमालभ्य इदमहमित्यादि जपति । उपविश्य वृहस्पतिर्ब्रह्मेत्यादि जपति । परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि । धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावतः इति उपद्रुत इत्यादिना द्यावापृथिव्यौ समीक्षते ॐयथाग्ने ब्रह्मणस्पतिः सत्यधर्मा अदीधरद्देवस्य सवितुः सव इत्युदपात्रमग्नेरुत्तरतः स्थापयति । तत्र च पवित्रे निक्षिप्य ॐइहेतदेववीरमृतं वसाना हिरण्यवर्णा आनवद्यत्वयाआपः समुद्रो वरुणाश्च राजा संपात भागान्हविषो जुषन्ताम् इन्द्रप्रशिष्टा वरुणप्रसूता आपः समुद्रादिवमुद्वहन्तु । इन्द्रप्रशिष्टावरुणप्रसूतां दिवस्पृथिव्याः श्रियमावहन्तु । अनेन मन्त्रेणोदपात्रे उदकं क्षिपति । विलीनपूतमाज्यमग्नावधिश्रित्य परित्वाग्ने पुरं वयं विप्रं सहस्य धीमहि । धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावतः इति त्रिः पर्यग्निकृत्वा उदगुद्वास्य पश्चादग्नेरासाद्य पवित्राभ्यामुत्पुनाति । ततो दर्भत्रयेण स्रुवसंमार्जनम् । ततो निष्टप्तं रक्षो निष्टप्ता अरातयः इति स्रुवप्रतपनम् । अथ ॐविष्णोर्हस्तोसि दक्षिणः पूष्णोदत्तं बृहस्पते तं त्वाहं स्रुवमाददे देवानां हव्यवाहनम् अयं स्रुवो निदधाति होमाच्छताज्जरच्छंदसा जागतेन । सर्वयज्ञस्य समनक्ति विष्टाबार्हस्पत्येन शर्मणा दैव्येनेति स्रुवाभिमन्त्रणम् ततः संस्कृतमेव घृतं स्ववामभागेग्नेः पश्चात्स्थापिताज्यधानीनामकपात्रान्तरे स्रुवेण कुर्यात् ॐभूःशं भूत्यै त्वा गृह्णे भूतये इति प्रथमं गृह्णाति ॐभुवःशंपुष्ट्यै त्वा गृह्णे पुष्टये इति द्वितीयम् । ॐस्वःशं त्वा गृह्णे सहस्रपोषाय इति तृतीयम् । ॐजनः शं त्वा गृह्णे परिमितपोषायेति चतुर्थम् । ततः स्रुवेण तद्घृतं जुहुयात् । अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्ति पाउ । नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुयाकर्मभागं स्वाहा । हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान् । सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जुषस्व हव्यं स्वाहा। पुरस्ताद्युक्तो वह जातवेदोऽग्ने विद्धि क्रियमाणं यथेदम्। त्वं भिषग्भेषजस्यासि कर्त्ता त्वयागामश्वं पुरुषं सनेमस्वाहा। यज्ञस्य चक्षुः प्रतिमुखं च वाचा श्रोत्रेण मनसा जुहोति। इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु समनस्यमानाः स्वाहा इति हुत्वा। ॐवृषणे वृहते स्वर्विदे अग्नये शुक्रं हरामि त्विषीमते। स नः स्थिरान्वलवतः कृणोतु ज्योक्चरो जीवातवेत्यंददात्वमग्नये स्वाहा इत्युत्तरपूर्वार्द्धे। अथ दक्षिणपूर्वार्द्धे। ॐत्वं सोमदिव्यो नृचक्षाः सुगमस्मभ्यं पथो अनुक्षः अभिनो गोत्रविदुप इव नेशोच्छानो वाचमुशती जिगाय सोमाय स्वाहा इत्याज्यभागौ हुत्वा अभ्यातानहोमं कुर्यात्। तद्यथा। सविता प्रसवानामधिपतिः समावतु अस्मिन् ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां वित्यामस्यामाहूत्यामाशिष्टयस्यां देवहूत्यां स्वाहा। सवित्रे प्रसवानामधिपतये। अग्निर्वनस्पतीनामधिपतिः। इत्यादिपूर्ववत् २ एवंसर्वत्राप्यग्रे। द्यावापृथिवी दातॄणामधिपती ३ वरुणोपामधिपतिः ४ मित्रावरुणौ वृष्ट्या अधिपती ५ मरुतः पर्वतानामधिपतयस्ते मावन्तु ६ सोमो वीरुधामधिपतिः ७ वायुरन्तरिक्षस्याधिपतिः ८ सूर्यश्चक्षुषामधिपतिः ९ चन्द्रमा नक्षत्राणामधिपतिः १० इंद्रो दिवोधिपतिः ११ मरुतापिठापशूनामधिपतिः १२ मृत्युः प्रजानामधिपतिः१३ यमः पितॄणामधिपतिः१४ तंता अवतरेतेमावंत्विति पूर्ववत् १५ ततस्ततामहास्ते मावंत्विति पूर्ववत्। अथोत्तराङ्गानि। तत्र पूर्ववत्सप्तदशाहुत्यात्मकं अभ्यातानहोमं कृत्वा शुक्लपक्षश्चेत् पूर्णापश्चादुतपूर्णापुरस्तादुन्मध्यतः पौर्णमासीजिगाय। तस्या देवौ संवसतो महित्वा नाकस्य पृष्ठे समिषामदेम स्वाहेति जुहोति। कृष्णपक्षश्चेत् यत्तेदेवा अकृण्वन्भागधेयममावास्ये संवसतोमहित्वा ते नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरस्वाहा। अथ आहूत्यै स्वाहा। कामाय त्वा स्वाहा समृधे त्वा स्वाहा आहुत्यै त्वा कामाय त्वा समृधे त्वा स्वाहा। ऋचा स्तोमं समर्धय गायत्रेण रथन्तरं वृहद्गायत्रवर्तनि स्वाहा इत्याहुतिपञ्चकं जुहुयात् इति समृद्धिहोमः। ततः। ॐ पृथिव्यामग्नये समनमन्त्यआर्ध्नोत्। यथापृथिव्याग्नयेसमनमन्वेवामह्यसन्नमः संनमतु। ततः पृथिवी धेनुस्तस्या अग्निर्वत्सः समेग्निना वत्से मूर्ज्जं कामं दुहां आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। अन्तरिक्षे वायवे समनमन्सआर्ध्नोत् यथान्तरिक्षे वायवे समनमन्नेवा मह्यं सन्नमः संनमन्तु। अन्तरिक्षे धेनु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्तस्या वायुर्वत्सः सामे वायुना वत्सेनेषमूर्ज्जं कामं दुहाम् । आयुः प्रथमं प्रजापोषं रयिं स्वाहा । दिव्यादित्याय समनमत्स आर्ध्नोत् यथा दिव्यादित्याय समनमन्ने वा मह्यं सन्नमः संनमन्तु द्यौर्धेनुस्तस्या आदित्यो वत्सः । साम आदित्येन वत्सेनेषमूर्जं कामं दुहाम् । आयुः प्रथमं प्रजापोषं रयिं स्वाहा । दिक्षु चन्द्राय समनमत्स आर्ध्नोत् यथा दिक्षु चन्द्राय समनमन्नेवा मह्यं सन्नमः सन्नमन्तु । दिशो धेनुवत्सां सा चन्द्रो वत्सः ता मे चन्द्रेण वत्सेनेषमूर्जं कामं दुहामायुः प्रथमं प्रजापोषं रयिं स्वाहा इत्याहुतिचतुष्टयं संनतिहोमः । प्रजापतेनत्वदेतान्यन्यो विश्वारूपाणि परिभूर्जजान । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा इत्युपस्तीर्थ होमः । ततोऽग्नेरुत्तरपूर्वार्धे । आदेवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोढुं अग्निर्विद्वान्स यजात्स इद्धोता सोध्वरान्स ऋतून्कल्पयात्यग्नये स्विष्टकृते स्वाहा इति मन्त्रेण जुहुयादिति स्विष्टकृत् । अथैकादश प्रायश्चित्ताहुतीः स्वाहेष्टेभ्यः स्वाहा । वषण्निष्टेभ्यः स्वाहा । भेषजं स्विष्टचै स्वाहा । निष्कृतिर्दुरिष्टचै स्वाहा । दैवीभ्यस्तनूभ्यः स्वाहा । अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमयाअसि । अयासा मनसा कृतो यासन् हव्यमूहिषः स्वाहा । ॐ स्वाहाभूः । स्वाहा भुवः स्वाहा स्वः स्वाहा ॐ भूर्भुवः स्वः स्वाहेति प्रतिप्रायश्चित्तहोमः । यन्मेस्कन्नमनसो जातवेदो यद्वा स्कन्दद्धविषो यत्र यत्र उत्पुरुषो विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहेति स्कन्नहोमः । यदस्मृति चकृम किंचिदग्र उपारिम चरणे जातवेदः । ततः माहित्वं ततः प्रचेतः सुमे सखिभ्यो य अमृतत्वमस्तुतः स्वाहा । इत्यस्मृतिहोमः । ततः यद्वद्य त्वा प्रयति यज्ञे अस्मिन्होतश्चिकित्वन्न वृणीमही हा ध्रुवमपो ध्रुवं हुताशविष्ठप्रतान्यज्ञमुपयाहि सोमं स्वाहा । समिन्द्रणो मनसानेष गोभिः संसूरिभिर्हरिवत्सं स्वस्त्या । संब्रह्मणा देवहितं यदस्ति संदेवानां सुमतौ यज्ञियानां स्वाहा । यान्नावह उशतो देवदेवांस्तान्प्रेरयस्वे अग्ने सधस्थे । यक्षिवांसः पपिवांसो मधून्यस्मै धत्त वसवो वस्वनि स्वाहा । सुगावो देवाः सदना अकर्म्मय आजग्म सवने मा जुषाणः । वहमाणा भरमाणाः स्वावसूनि वसुं धर्मं दिवमारोहतां नु स्वाहा । यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ । स्वां योनिं गच्छ स्वाहा एष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीर्यः स्वाहा । वषट्कृतेभ्यो वषड्हुतेभ्यः । देवा गातु विदो गातुं वित्वा गातुमित

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाहा । इत्याहुतिसप्तकं संस्थितिहोमः । ततः समनस्पत इमं नो दिवि देवेषु यज्ञं स्वाहा । दिवि स्वाहा । पृथिव्यां स्वाहा । अन्तरिक्षे स्वाहा । वातेधा स्वाहेत्याहुतिपञ्चकं हुत्वा आज्यस्थालीघृतमुत्तमं चतुर्वारं स्रुवेण गृहीत्वा आज्यधान्यां संस्थाप्य स्रुवेणैकवारं तूष्णीं जुहुयात् । इति समानहोमः । अथ स्तरणक्रमेण वर्हिरुत्थाप्य त्रिगुणीकृत्याज्यधान्या घृतेनाभ्यनक्ति । पृथिव्यै त्वेतिमन्त्रं प्रथमं मूले युनक्ति । अन्तरिक्षाय त्वेति मध्यं युनक्ति दिवेत्वा इत्यग्रं युनक्ति । एवं त्रिः कृत्वा ॐसंवर्हिरक्तं हविषा घृतेन समिन्द्रेण वसुना संमरुद्भिः । संदेवैर्विश्वदेवेभिरक्तमिन्द्रं गच्छतु बर्हिः स्वाहेत्यनेन वर्हिर्जुहोति । अथ संस्रावभागास्तविषा बृहन्तः । प्रस्तरेष्ठाबर्हिषदश्च देवाः इमे यज्ञमभि विश्वे गृणन्तः स्वाहा । देवा अमृता मादयन्तां स्वाहा । इति संस्रावभागहोमः । स्रुवोसीति स्रुवं प्राग्दण्डं निदधाति । स्रुवप्रतिष्ठापनान्ते इन्द्रं चन्दनपुष्पधूपदीपनैवेद्यतांबूलदक्षिणाभिः पूजयेत् । त्रातारमिन्द्रेति पुष्पाञ्जलिं दद्यात् । ततोऽग्न्यायतनस्य समन्ताद्दिक्षु विदिक्षु च माषभक्तबलीन्सदीपान् दिक्पालेभ्यो दद्यात् । त्रातारमिन्द्रमिति इन्द्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्तबलिर्नमः । भो इन्द्र दिशं रक्ष बलिं भक्ष यजमानस्यायुःकर्त्ता क्षेमकर्त्ता शुभकर्त्ता शान्तिकर्त्ता भवेति प्रार्थयेत् एवं सर्वत्र । अग्नेर्मन्वे इत्याग्नेये । यममन्त्रेण याम्ये । नमोस्तु ते निर्ऋत इति नैर्ऋत्ये । ये पश्चादिति पश्चिमे । वायोः सवितुरिति वायव्ये । य उतस्तंरत इत्युत्तरे । ईशाना त्वा ईशाने इति दिक्पालेभ्यो बलिं दद्यात् । ततो महाबलिं कुंकुमादिरक्तं रक्तपुष्पादियुतं सदीपं सदक्षिणं क्षेत्रपालाय दद्यात् । क्षेत्रियात्व वा क्षेत्रस्य पतिमाक्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरिवारयुतायेत्यादि इमं बलिं शूद्रेण दुर्ब्राह्मणेन वा चतुष्पथेऽन्यत्र वा नाययेत् । ततः प्रक्षालितपाणिपाद आचान्तो देशकालौ स्मृत्वा कृताया ऐंद्र्याः शान्तेः पूर्णतासिद्ध्यर्थं पूर्णाहुतिं होष्यामीति संकल्प्य स्रुचिद्वादशगृहीतं चतुर्गृहीतं वाज्यं कृत्वा वस्त्रयुतनालिकेरादिफलं चन्दनादियुतं तदुपरि निधाय पूर्णाहुतिं अभिभूर्यज्ञ इत्येतैस्त्रिभिःसूक्तै राज्ञान्वारब्धो हुत्वा कर्मशेषं समापयेदाचार्यः । विमुञ्चामीत्यादि समिश्रयहोमः । तेजोसीति मुखं विमार्ष्टि । दक्षिणेनाग्निं त्रीन्विष्णुक्रमान् क्रमते विष्णोः क्रमोसीति । सूर्यस्यावृतमित्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भिदक्षिणमावर्तते । अगन्मस्वरित्यादित्यमीक्षेत । इन्द्रवयं वसावयमिन्द्रस्य वरुणस्य च ब्रह्मणा स्थापितपात्रं पुनरुत्थापयामसि । अपरेणाग्निमुदपात्रं परिहृत्योत्तरेणाग्निं आपोहिष्ठामयो भुव इति मार्जयित्वा बर्हिषि पत्न्यञ्जलौ निनयति । समुद्रं वः प्रहिणोमीति । वीरपत्न्यहं भूयासं यदा यजमानस्तदा वीरपुरुषोहं भूयासमिति मुखं निमार्ष्टि । व्रतानि व्रतपत इति समिधमादधाति । सत्यंत्वर्त्तेनेति सह हविर्भिः पर्युक्ष्य । उदञ्चि हविरुच्छिष्टान्युद्वासयति । पूर्णपात्रं दक्षिणा । ब्रह्मोत्थापनम् उत्तिष्ठ ब्रह्मणस्पत इति । यस्मात्कोशादिति नमस्कारः । ततः कलशोदकेन शान्त्युदकेन च दूर्वापल्लवैरुदङ्मुख आचार्य ऋत्विजश्च तिष्ठतः । प्राङ्मुखं सकुटुम्बमुपविष्टं राजानमभिषिञ्चेयुः । अभिषेके पत्नी वामभागे । पवित्रं शतधारं प्रयतेतः पापिलक्ष्मीतिचतस्रः । हिरण्यवर्णाः । एवमभिषेकानन्तरं सर्वौषधीभिरनुलिप्य शुद्धोदकेन स्नात्वा परिधत्ते वाससी परिधाय शुक्लमाल्याम्बरानुलेपनः सपत्नीको यजमान आचार्यादीन् संपूज्य तेभ्यो दक्षिणां दद्यात् । ब्राह्मणो दश गा दद्यादनड्वाहं ततोऽधिकम् । सीराधिकं ततो वैश्यस्तथा प्रादेशिको हयम् । राजा दद्याद्वरं ग्रामं समूहो राजवत्तथा । यथोक्तां दक्षिणां दद्यात्सकलं फलमश्नुते । अद्येत्यादि समयमुच्चार्य कृतस्य ऐन्द्रशान्त्याख्यकर्मणः प्रतिष्ठासिद्ध्यर्थं एकादशधेनू रुद्रदेवत्याः अमुकगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे । एवमनडुद्ग्रामभूमिहस्त्यश्वरथरत्नादि दद्यात् । स्थापितदेवतापूजननमस्कारौ । आवाहनं न जानामि । अपराधसहस्राणि क्रियन्तेहर्निशं मया । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं यान्तु देवगणा इति पीठदेवता विसृज्य । प्रतिमां सोपस्करामाचार्याय दत्वाग्निं संपूज्य गच्छ गच्छ सुरश्रेष्ठेति विसृज्य यथाशक्ति ब्राह्मणान् भोजयित्वा चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु इति पठेत् । इत्यैन्द्रशान्तिप्रयोगः ।

अभिषेकदिने च कृतनित्यक्रियो दर्भपाणी राजा प्राङ्मुख आसन उपविश्येष्टदेवता ध्यात्वा नमस्कृत्य मासपक्षाद्युल्लिख्य सकलराष्ट्रवश्यताकामोहं सांवत्सरपुरोहिताभ्यामात्मानमभिषेचयिष्य इति संकल्प्य गणेशपूजास्वस्तिवाचनमातृकापूजावसोर्धारापूजाऽभ्युदयिकश्राद्धानि कृत्वा सांवत्सरपुरोहितौ त्रीन् ऋग्यजुर्विदो विप्रक्षत्रियवैश्यानमात्यान्सामगं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चैकं विप्रममात्यमन्यच्चैकं अन्यतमवेदविदं वृत्वा मधुपर्कं कुण्डलकेयूरकटककण्ठाभरणाङ्गुलीयकवस्त्रादिभिस्तान्संपूज्य चतुर्वर्णमुख्यानुपवेशयेत्। अथ पूर्वदिने कृतोपवासः पुरोहितः सितमाल्यचन्दनवासाः सोष्णीषो होमदेशं परिकल्प्य तस्मादुत्तरतोरणकदलीस्तंभमंडितायां स्नानशालायां व्रीहिषु यवेषु वा सौवर्णं नवकलशं यथाविधि संस्थाप्य यथासंभवमनेकतीर्थजलेनापूर्य सर्वौषधिसर्वगन्धसर्वरत्नसर्वबीजफलक्षीरिवृक्षक्षीरिलतापल्लवान् क्षिप्त्वा बहुभिः सितवस्त्रैर्मालाभिश्चावेष्टय तत्समीप एकं पञ्चगव्ययुतजलपूर्णं मृन्मयं घृतेन पूर्णं हैमं कुंभं दुग्धेन राजतं दध्ना ताम्रं मधुना मार्त्तिकं कुशोदकेन च मार्त्तिकं शतछिद्रं च सौवर्णमन्यांश्च यथालाभं नदीसरःकूपचतुःसमुद्रोदकपूर्णान् मार्त्तिकान्स्थापयेत्। सर्वेषां च कलशानामुच्चता षोडशाङ्गुला। वैपुल्यं द्विपञ्चाशदङ्गुलसूत्रवेष्टनयोग्यम् ततः पुरोहितो होमदेशे आथर्वणगृह्योक्तेनाज्यसंस्कारैरैन्द्रशान्तिप्रयोगलिखितेन प्रकारेणाग्निस्थापनादिसप्तदशाहुत्यात्मकाभ्यातानहोमान्तानि पूर्वाङ्गानि कृत्वा शर्मवर्म २ स्वस्त्ययना२ऽयुष्य ३ अभ ४ यापराजिता ५ ख्यैः पञ्चभिर्गणैराथर्वणपरिशिष्टोक्तैराज्यं जुहुयात्। ते च गणा वक्ष्यन्ते। होमदेशस्थापितहैमकलशे च संपातान् क्षिपेत्। राजा च सितचन्दनपुष्पवासाःसर्वालंकारयुतोऽग्नेर्दक्षिणतः उपविश्य सांवत्सरप्रभृतिभिर्दैवज्ञैः सदस्यमुख्यैः पुरोहितैश्च हूयमानाग्नेर्निमित्तानि पश्येत्। तानि च निमित्तानि प्रमाणनिर्णये दक्षिणावर्त्तशिख इत्यादिनोक्तानि। एवं पुरोहितः प्रधानहोमं समाप्यैन्द्रशान्त्युक्तेनैव प्रकारेण सप्तदशाहुत्यात्मकाभ्यातानहोमादिब्रह्मोत्थापननमस्कारान्तान्युत्तराङ्गानि कृत्वा सुगन्धतैलादिना स्वेच्छया कृतस्नानं स्नानशालायामानीयासनउपवेश्य मृद्भिः स्नपयेत्। तत्र सहस्रशीर्षेति पर्वताग्रमृदा शिरः। अक्षीभ्यां त इति वल्मीकान्तमृदा कर्णौ। तेनैव बिल्वालयमृदा मुखं ग्रीवाभ्यस्त इतीन्द्रध्वजस्थानमृदा ग्रीवाम्। आन्त्रेभ्यइतिराजाङ्गणमृदा हृदयम्। यस्य विश्वानि हस्तयोरिति गजदन्तोद्धृतमृदा दक्षिणवामभुजौ। बन्हीनां पितेति सरोमृदा पृष्ठम्। नाभानाभिं न इति संगममृदोदरम्। आतेसिञ्चामीति नदीकूलद्वयमृदा पार्श्वौ। सोमानं स्वरणमिति वेश्याद्वारमृदा कटिम्। ऊरुभ्यां त इति गजस्थानमृदोरू। मेहनाद्वलमिति गोष्ठमृदा जानुनी। तेनैवाश्वस्थानमृदा जङ्घे। एतावानस्येति रथचक्रोद्धृतमृदा पादौ। अङ्गादङ्गादिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वमृद्भिः सर्वाङ्गानि । ततः पूर्वस्थापितेन पञ्चगव्ययुतेन जलकुंभेन स्नपयेत् । मन्त्रास्तु गन्धद्वारां, आप्यायस्व, दधिक्राव्णः, तेजोसि शुक्रं आपोहिष्ठेत्याद्याश्च । तदा राजा तदासनं त्यक्त्वा भद्रासन उपविशेत् । भद्रासनं तु हैमं राजतं ताम्रं क्षीरिदारुजं वा माण्डलिकस्य हस्तेनोच्चमायतं च । अनंतरजितः सपादहस्तेन । महाराजस्य सार्द्धहस्तेन । ततो विप्रामात्यस्तेजोसीति पूर्वस्थापितेन घृतपूर्णहैमकुंभेन प्राच्यां स्थित्वाभिषिञ्चेत् । क्षत्रियामात्य आप्यायस्वेति दुग्धपूर्णेन रौप्यकुंभेन दक्षिणतः स्थित्वा । वैश्यामात्यो दधिक्राव्णेति दधिपूर्णेन ताम्रकुंभेन पश्चिमतः स्थित्वा । छन्दोगामात्यो मधुवाता इतित्यृचेन मधुपूर्णेन मृत्कुंभेनोत्तरतः स्थित्वा । स एव देवस्यत्वेति कुशोदकपूर्णेन मृत्कुंभेन तत्रैव स्थित्वा। देवस्य त्वेत्यस्यान्ते अभिषिञ्चामीति वाक्यशेषः । ततः पुरोहितोऽग्निं रक्षध्वमिति सदस्यान्प्रेष्य संपातयुतेन हैमकुंभेन राजसूयाभिषेकमन्त्रैरभिषिञ्चेत् । ते च यजुषास्तावत् । सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण क्षत्राणां क्षत्रपतिरेध्यतिदिद्यून्याहिम् । इमं देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय इममसुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोमीराजा सोमोस्माकं ब्राह्मणानां राजेति । इममित्यस्य स्थाने द्वितीयान्तं राज्ञोनाम अमुष्येत्यत्र षष्ठयन्तं तत्पितुः अमुष्या इत्यत्र षष्ठयन्तं तन्मातुः इमा आपः शिवतमा इति तृच आग्वेंदिकः देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा वर्चस्य सूर्यस्य वर्चस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामीति यजुः । भूर्भुवः स्वरिति व्याहृतयश्च । एवमन्येपि तत्तच्छाखीया बोध्याः । ततः पुरोहितो वह्निसमीपं गच्छेत् । ततो वेदशास्त्राभिज्ञोऽन्यो विप्रो भद्रासनगतमेव राजानं शतच्छिद्रसौवर्णकुंभेनाभिषिञ्चेत् । ततः या ओषधीरिति सर्वौषधीनामुदकं क्षिपेत् । रथे तिष्ठेति यजुषा सूक्तेन गन्धस्योदकम् । आब्रह्मन् ब्राह्मणेति यजुषा बीजानाम् । पुष्पवतीत्यथर्वणमन्त्रेण पुष्पाणाम् । तेनैव मन्त्रेणानेकफलानाम् । आशुः शिशान इति सूक्तेन रत्नानाम् । ये देवाः पुरःसदेति कुशानामुदकेन । केचित्तु कुशदूर्वापल्लवैरनेन मन्त्रेण राजाङ्गानि मार्जयेदित्याहुः । ततोन्य ऋग्वेदी विप्रो गोरोचनया गन्धद्वारेति मन्त्रेण राज्ञः शिरः कण्ठं च लिम्पेत् । ततः समीचीना विप्राः क्षत्रिया वैश्याः शूद्राः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनुलोमाश्च यथालाभं गङ्गायमुनाद्यनेकनदीसरःकूपचतुःसमुद्रनिर्झरजलपूर्णैः पूर्वासादितैरनेककलशैः स्वस्वशाखीयैर्मन्त्रैः शूद्रानुलोमादयश्च तूष्णीमेवाभिषिञ्चेयुः । एतस्मिन्नेव कालेऽमात्यमुख्याश्च छत्रचामरवेत्रान् धारयेयुः । वादकाः शंखभेर्यादीनि वादयेयुः विप्रा मन्त्रपाठं बन्दिनश्च स्तुतिं कुर्युः । ततः सांवत्सरः सर्वकुंभमध्य आसादितहैमकुंभोदकं कुशैर्गृहीत्वा वक्ष्यमाणैः सुरास्त्वामभिषिञ्चन्त्वित्यादिभिरशीत्युत्तरशतैः श्लोकैरभिषिञ्चेन्मन्त्रान्ते । मन्त्रास्तु अभिषिञ्चन्त्विति क्रियापदानुसारेणैकसार्द्धद्वित्रिश्लोकात्मका ज्ञेयाः । सर्वमन्त्रान्ते सर्वं तत्कलशस्थं जलं क्षिपेत् । ते च श्लोकाः समाप्तौ वक्ष्यन्ते । ततो राजा सुगन्धितैलोद्वर्तनशुद्धोदकैः स्नात्वा श्वेतोष्णीषादिवस्त्राणि धृत्वादर्शे आज्ये च प्रतिबिम्बं दृष्ट्वा तदाज्यपात्रं ससुवर्णं ब्राह्मणाय दत्त्वा चन्दनकुंकुमदधिदूर्वादिमंगलद्रव्याण्यालभ्य श्रीविष्णुं सुवर्णादिप्रतिमायां पूर्वमण्डलेऽक्षतपुञ्जे वा षोडशोपचारैर्ब्राह्मणान्वस्त्रालंकारादिभिः सांवत्सरपुरोहितौ च मधुपर्कवस्त्रालंकारादिभिः पूजयेत् । अथ दैवज्ञः प्रागुक्तलक्षणं पट्टं ललाटे मुकुटं च मूर्ध्नि बध्नीयात् । ततः पुरोधा राजानं शुभलग्ने उत्तरोत्तरक्रमेण वृषमार्जारतरक्षुसिंहव्याघ्रचर्मबहुमूल्यवस्त्रोत्तरच्छदेन चोपर्युपर्याच्छादिते मञ्च उपवेशयेत् । ततो द्वारपालस्तत्रोपविष्टाय राज्ञेऽमात्यान्पौरान्वणिजः प्रकृतीश्च क्रमेण दर्शयेत् । राजा तु ग्रामवासोगजाश्वसुवर्णगोजाविगृहैरभिषेचकौ सांवत्सरपुरोहितौ संपूज्य ऋग्यजुःसामविदः त्रीन्विप्रांश्च तथैव संपूज्यान्यांश्च ज्योतिर्विदः पुरोहितं विप्रमुख्यांश्च यथाविभवं संपूज्य गोरसमोदकादिभिः संभोज्य गोवस्त्रतिलरूप्यान्नफलहेमसुपुष्पभूम्यादीनि तेभ्यो दत्वा चन्दनकेसरादिभिरलंकृतो दधिदूर्वादीनि मंगलद्रव्याण्यालभ्य सशरचापहस्तोऽग्निं प्रदक्षिणीकृत्य गुर्वादीन्नत्वा महावृषं गां च सवत्सां पृष्ठदेशे स्पृशेत् । ततः पुरोधाः सलक्षणं जात्यश्वं महागजं च तत्रानाय्य तौ सर्वौषधिकलशेन या ओषधीरिति संस्नाप्य वस्त्रपर्याणसुवर्णरूप्यालंकारादिभिरलंकृत्याश्वं राज्ञः पुरत आनीयाभिमन्त्रयेत् । ते च मन्त्रा अश्वशान्तौ । जयाश्च त्वं मया राज्ञस्तुरंगाद्यः प्रतिष्ठितः । स्मराद्य लक्ष्म्याः पुत्रस्त्वं गन्धर्वं त्वं तथास्मर । यथा नृणामयं राजा तथा त्वं भव वाजिनाम् । यथा भवन्तं नृपतिर्नित्यसेवारुरुक्षति । तथा त्वं रक्ष राजानं सर्वावस्थागतं हय । दर्शयाश्च तथा स्वप्ने दैवदो-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षमुपागतम् । तुरगान् सकलान् रक्ष त्वयि भारोऽयमर्पितः । अद्यप्रभृति राजा त्वामग्रेणाभ्येति भक्तितः । अभ्यर्चयिष्यति सदा गन्धमाल्यानुलेपनैः । आशीर्भिश्च द्विजातीनां तथा च स्वस्तिवाचनैः । रक्षतु त्वां महेन्द्रस्तु पूर्वेण त्रिदशाधिपः । दक्षिणेन यमो देवः पश्चिमेन जलाधिपः । उदग्वैश्रवणो देवः सर्वे रक्षन्तु सर्वत इति । ततो गजमपि दक्षिणे कर्णे दैवविदा मन्त्रितं राजारोहेत । तन्मन्त्रास्तु गजशान्त्युक्ताः । श्रीगजस्त्वं कृतो राज्ञा भव तस्य गजाग्रणीः । गन्धमाल्यान्नभक्ष्यैस्त्वां पूजयिष्यति पार्थिवः । लोकः सदा भयं पूजां करिष्यति यथा तव । पालनीयस्त्वया राजा युद्धेऽध्वनि तथा गृहे । तिर्यग्भावं समुत्सृज्य दिव्यभावमनुस्मर । देवासुरे पुरा युद्धे श्रीगजस्त्रिदशैः कृतः । ऐरावणसुतः श्रीमानरिष्टो नाम वारणः । श्रीगजानां तु यत्तेजः सर्वमेवोपतिष्ठतु । तत्तेजस्तव नागेन्द्र दिव्यभावसमन्वितम् । उपतिष्ठतु भद्रं ते रक्ष राजानमाहवे । इति । अथ राजा तं गजमारुह्य गजारूढैरेव मुख्यामात्यसामन्तसांवत्सरपुरोहितादिभिः सह महापथेन स्वपुरं परिभ्रम्य देवतायतनानि गत्वा यथाविभवं देवताः संपूज्य गजारूढो गजारूढैरेव तैः सह गृहमागत्य गजादवतीर्य गजावतीर्णैरमात्यादिभिः सहान्तर्गृहं प्रविश्य तान्सर्वानन्यांश्च लोकान् यथाविभवं दानमानसत्कारप्रियवचोभिः सत्कृत्य कोटिलक्षायुतान्यतमसंख्यया विप्रान् संभोज्य दीनानाथेभ्यो भूयसीं दक्षिणां दत्त्वा स्वस्तिवाचनं कारयित्वा सर्वान्विसृज्य सुहृदादियुतोऽतिहृष्टमना भुञ्जीत । इति राजाभिषेकप्रयोगः ।

अथ पूर्वोपयुक्ताः शर्मवर्मादिगणाः । यथाद्यौश्च पृथिवी च नबिभीतो नरिष्यवः । एवा मे प्राणमाबिभेः १ यथाहश्च रात्री च नबिभीतो नरिष्यथः । एवा मे यथा सूर्यश्च चन्द्रश्च ३ यथा ब्रह्म च क्षत्रं च ४ यथा सत्यं चानृतं च ५ यथा भूतं च भव्यं च ६ प्राणापानौ मृत्योर्मापातं स्वाहा । द्यावापृथिवी उपश्रुत्यामा० सूर्यश्चक्षुषामापाहि० अग्ने वैश्वानरविश्वैर्मादेवैः पाहि विश्वंभर विश्वेनमाभरमापाहि ५ ॐजोस्योजो मे दाः स्वाहा० सहोसि सहो मे दाः बलमसि बलं मे दाः । आयुरस्यायुर्मे दाः । श्रोत्रमसि श्रोत्रं मे दाः । चक्षुरसि चक्षुर्मे दाः । परियाणमसि परियाणं मे दाः । तुभ्यमेव जरि मन्वर्धता वयंमे प्रपन्ये मृत्यवो हिंसिषुः शन्तये । मातेव पुत्रं प्रमाना उपस्थे मित्रऐनमियात्या त्वंहसः । मित्र एनं वरुणो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मारिषाद जरामृत्युं कृणुतां संविदानौ। तदग्निर्होता वयुनानि विद्वान्विश्वा देवानां जनिमाविवक्ति। त्वमीशिषे पशूनां पार्थिवानां ये जाता उत वा ये जनित्राः। मेमं प्राणो हासीन्मो अपानो मेमं मित्रावधिषुर्मो अमित्रैः। द्यौष्ट्वा पिता पृथिवी माता जरामृत्युं कृणुतां संविदाने यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः। इममग्न आयुषे वर्चसे प्रियं रेतो वरुण मित्रराजन्। मातेवास्मा अदिते शर्म यच्छन् विश्वे देवा जरदष्टिर्यथासत्। अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां चुबुकादधि। यक्ष्मं शीर्षण्यं मस्तिष्काज्जिव्हाया विवृहामि ते। ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मं दोषण्यामंसाभ्यां बाहुभ्यां विवृहामि ते २। हृदयात्ते परिक्लोम्नोहलीक्ष्णात्पार्श्वाभ्याम्। यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नत्ते विवृहामसि। आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठो रुदरादधि। यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्या विवृहामि ते। ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्। यक्ष्मं भसद्यांश्रोणिभ्यां भसदंभं ससो विवृहामि ते। अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमनिभ्यः। यक्ष्मं पाणिभ्यामङ्गुलिभ्यो नखेभ्यो विवृहामि ते। अङ्गे अङ्गे लोम्नि लोम्नि यस्ते पर्वणि पर्वणि। यक्ष्मं त्वचस्य ते वयं कश्यपस्य विषहर्षेण विश्वञ्चं विवृहामसि। ७ मुञ्चामि त्वा हविषा जीवनायकमज्ञातयक्ष्मादुत राजयक्ष्मात्। ग्राहिर्जग्राह यथेतदेजं तस्या इन्द्राग्नी प्रमुमुक्तमेनम् २ यदिक्षितायुं यदि वा परेतो यदि मृत्योरन्तिक नीत एव। तमाहरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय २ सहस्राक्षेण शतवीर्येण शतायुषा हविषा हार्षमेनम्। इन्द्रो यथैनं शरदो न यात्यन्तिविश्वस्य दुरितस्य पारम्। शतं जीव शरदो वर्द्धमानः शतं हेमन्तान् शतमु वसन्तान्। शतं त इन्द्रो अग्निः सविता बृहस्पतिः शतायुषा हविषा हार्षमेनम्। प्रविशतं प्राणापानावनड्वाहाविव व्रतम्। कान्येयन्तुमृत्यवो यं नाहुरितरान् शतम्। इहैव स्तं प्राणापानौ मापगातमितो युवम्। शरीरमस्याङ्गानि जरसेवहतं पुनः। जरायै त्वा परिददामि जरायै निधुवामि त्वा। जरा त्वा भद्रानेष्टव्यन्येयन्तुमृत्यवो यानाहुरितरान् शतम्। उत देवा अवहितं देव उन्नयथा पुनः। उतागश्चक्रुषं देवा देवा जीवयथा पुनः। द्वाविमौ वातौ वात आसिन्धोरापरावतः। दक्षन्ते अन्य आवातुव्यन्यो वातु यद्रयः। आवातवाहि भेषजं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विवातवाहि यद्रयः। त्वं हि विश्वभेषजो देवानां दूत ईयसे। त्रायन्तामिह देवास्त्रायतां मरुतां गणः। त्रायन्तां विश्वाभूतानि यथायमरपा असत्। आत्वागमं शन्तातिभिरथो अरिष्टतातिभिः। यक्ष्मं त उग्रमाभारिषपरायक्ष्मं सुवामि ते। अयं मे हस्तो भगवायं मे भगवत्तरः। अयं मे विश्वभेषजो यं शिवाभिमर्शनः। हस्ताभ्यां दशशाखाभ्यां जिव्हावाचः पुरो गवी। अनामयित्नुभ्यां हस्ताभ्यां ताभ्यां त्वापि स्पृशामसि। आवतस्त आवतः परामतस्त आवतः इहैव भवमानुगामापूर्व्याननुगाः पुत्रे न सुबध्नामि ते दृढे। यस्त्वाभिचेरुपुरुषः स्वोयदरणे जनः। उन्मोचनप्रमोचने उभे वाचा वदामि ते यद्रुद्रो हितशेपिशेस्त्रियै पुंसे अचित्या। उन्मोव्यदेनसो मातृकृताच्छेषे पितृताच्च यत्। उन्मो० यत्ते माता यत्ते पिता जामिर्भ्राता च सज्जनः। प्रत्यक् स्वेव स्वभेषजं जरदष्टिं कृणोमि त्वा। इहैवधिपुरुषसर्वेण मनसा सह। द्रूहूतोपमस्वमानुगा अधिजीवपुरा इहि। अनुभूतपुनरेहि विद्वान् उदयनं पथः। आरोहणमाक्रमणं जीवतो जीवतोयने माबिभेर्नमरिष्यसि। जरदष्टिं कृणोमि त्वा निरवोचमहं यक्ष्ममङ्गेभ्योङ्गज्वरं तव। अङ्गभेदो अङ्गज्वरो यश्च ते हृदयामयः यक्ष्मश्येन इवप्रायप्तद्वाचा साढःपरस्तरां। ऋषी बोधप्रतीबोधावस्वप्नोयश्च जागृविः। तौ ते प्राणस्य गोप्तारौ दिवा नक्तं च जागृताम्। अयमग्निरुपसद्य इह सूर्य उदेतु ते। उदेहि मृत्योर्गभीरात्कृष्णाच्चितमसस्परि। नमो यमाय नमो अस्तु मृत्यवे नमः पितृभ्य उत ये नयन्ति। उत्पारणस्य यो वेद तमग्निं पुरोदधे स्मा अरिष्टतातये। ऐतु प्राण ऐतु मन ऐतु चक्षुरथोवलम्। शरीरमस्य संविदां तत्पद्भ्यां प्रतितिष्ठतु। प्राणेनाग्ने संसृजतु धातः प्राणो न संदितः। प्राणेन विश्वतो मुखं सूर्यं देवा अजयन् आयुषायुः कृतां जीवा युष्मान् जीवमामृथाः। प्राणेनात्मातां जीवामामृत्योरुदकावरं देवानां निहितं निधिं यमिह्रान्नविन्दत् पथिभिर्देवयानैः। आपो हिरण्यं जुगुपुस्त्रिवृद्भिस्तास्त्वा रक्षन्तु त्रिवृतास्त्रिवृद्भिः। त्रीन्नाकांस्त्रीन्समुद्रांस्त्रीन्ब्रध्नांस्त्रीन्वैष्टपांस्त्रीन्मातृष्वनस्त्रीन्सूर्यान्गोप्तॄन् कल्पयामि ते। उपप्रियं पनिप्नन्तंयुवानमाहुतीवृधम्। अगन्मविभ्रतो नमो दीर्घमायुः कृणोतु मे। अन्तकाय मृत्यवे नमः प्राणापाना इह ते रमन्ताम्। इहायमस्तु पुरुषः सहासुना सूर्यस्य भागे अमृतस्य लोके।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उदेनं भगो अग्रमीडदेनं सोमो अंशुमान् उदेतं मरुतो देवा उदिन्द्राग्नी स्वस्तये। इहतेसुरिह प्राणा इहायुरिह ते मनः। उत्वानिर्ऋत्याः पाशेभ्यो दैव्या वाचा भरामसि। उत्क्रामातः पुरुषमावपत्या मृत्योः षड्विंशरवमुच्चमानः। मास्थित्या अस्माल्लोकादग्नेः सूर्यस्य संदृशः। तुभ्यं वातः पवतां मातरिश्वा तुभ्यं वर्षत्वमृतान्यापः। सूर्यस्ते तन्वे ३ शंतयामि त्वां मृत्युर्दयतां काप्रमेष्ठाः। उद्यानं ते पुरुषनावनावयानं जीवातुं ते दक्षतातिं कृणोमि। आहिरोमरममृतं सुखं रथमथर्जिर्विर्चिदथमवदासि। मा ते मनस्तत्र गान्मातिरो भून्माजीवेभ्यः प्रमदो मानुगाः पितॄन्। विश्वे देवा अभिरथं तु त्वैह मागतान्ममादीधीथा येन यं नयन्ति परावतम्। ७ आरोहतमसोज्योतिरेह्याते हस्तैरभामहे। शामश्च त्वा मा शबलश्चप्रेषितौ यमस्य यौ पथि रपीश्वानौ। अर्वाङेहि माविदीध्योमात्रविष्ठः पराङ्मनाः। मैनं पन्थामनुगाभीम एष येन पूर्वं नृपथ तं ब्रवीमि। तमएतत्पुरुषमापप्रस्थाभयं परस्तादभयं ते अर्वाक्॥ १०॥ द्विपदाः रक्षन्तुत्वाग्नयो ये अएस्वतारक्षन्तुत्वा मनुष्या ३ यमिन्धते। वैश्वानरो रक्षतु जातवेदा दिव्यस्त्वा मा प्रधाग्विद्युता सह। मा त्वा क्रव्यादभिमंस्तारात्संकसुकाचर। रक्षतु त्वा द्यौरक्षतु पृथिवी सूर्यश्चत्वारक्षतां चन्द्रमाश्च। अन्तरिक्षं रक्षतु देवहेत्याः। बोधश्च त्वा प्रतिबोधश्च रक्षतामस्वप्नश्च त्वानवद्राणश्च रक्षताम्। गोपायंश्च त्वा जागृविश्च रक्षताम्। ते त्वा रक्षतु ते त्वा गोपायन्तु तेभ्यो नमस्तेभ्यः स्वाहा। जीवेभ्यस्त्वा समुदेवायुरिंद्रो धाता दधातु सविता त्रायमाणः। मा त्वा प्राणो बलं हासीदसं ते तु व्हयामति। मा त्वा जंभः संहनुर्मा तमो विंदन्मा बर्हिः प्रमयुः कथास्याः। उत्वादित्या वसवो भरन्तूइन्द्राग्नी स्वस्तये। उत्वा द्यौरुत्पृथिव्युत्प्रजापतिरब्रवीत्। उ त्वा मृत्योरोषधयः सोमराज्ञीरपीपरन्। अयं देवा इहैवास्तयं मा पुत्रगादितः। इमं सहस्रवीर्येण मृत्योरुत्पातयामपि। उत्वा मृत्योरपीपरं संबंधन्तुवयोधतः। मा त्वा व्यस्तकेश्यो मा त्वा पुरुदो रुदन्। आर्षममिदं त्वा पुनरागाः। पुनर्णवः। सर्वाङ्गसर्वं ते चक्षुः सर्वमायुश्च ते विदन्। व्यवांते ज्योतिरभूदयत्वंतमो अक्रमीत्। अपत्वन्मृत्युं निर्ऋतिमययक्ष्मं निदध्मसि। आरभस्वे मा मृतस्य श्रुष्टिरच्छिद्यमानाजरदष्टिरस्तु ते असुं त आयु पुनराभरामि रजस्तमो मोपगामाप्रमेष्ठाः। जीवतां ज्योतिरभ्ये-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ह्यर्वाङगत्वा हरामि शतशारदाय। अवमुश्च मृत्युपाशानशष्टिंद्राघीय-आयुः प्रतरं ते दधामि। वातात्तेप्राणमविदन्सूर्याच्चक्षुरिदं तव यत्ते मरस्त्वयि तद्धारयामि संवित्साङ्गैर्मदजिव्हया लपन्। प्राणेन त्वां द्विपदां चतुष्पदामग्निमिव जातमभिसंधमासि। नमस्ते मृत्यो चक्षुषे नमः प्राणाय ते करन्। अयं जीवतु मा मृतेयं समैरपामसि। कृणो-म्यस्मै भेषजमृत्यो मा पुरुषं वधीम्। जीवलानधारिषाजीवन्ति मोष-धीमहम्। त्रायमाणां सहमानां सहस्वतीमिह हुवे स्मा अरिष्टतातये। अधिब्रूहि मा रभथाः सृजेमं तवैव संछर्वस्ताया इहास्तु। भवाशर्वो मृडतंशर्वयछत मयसिध्यदुरितंधत्तमायुः। अस्मै मृत्यो अधिब्रूहि मन्द यस्रोदितो। यमेतु। अरिष्टः सर्वाङ्गः सभुर्जरसाशतहायन आत्मना सुजमश्नुताम्। देवानां हेतिः परित्वा वृणक्तु पारयामि त्वा जरस उ त्वा मृत्योरपीपरन्। आरादग्निं क्रव्यादं तिरूहं जीवातवे ते परिधिं दधामि। यत्ते निपातं रजसं मृत्यो अनवधृष्येम्। पथ इमं तस्माद्र-क्षन्तो ब्रह्मास्तैवमकृणमसि॥ १॥ कृणोमि ते प्राणापानौ जरां मृत्युं दीर्घमायुः स्वस्ति। वैवस्वतेन प्रहितान्यमदूतांश्चरतोपसेधामि सर्वान्। आरादरातिं निर्ऋतिं परोग्राहिं क्रव्यादः पिशाचान्। रक्षोयस्सर्वं दुर्भूतं तत्तम इवापहन्मसि। अग्नेष्टेप्राणममृतादायुष्मतो वन्वे जातवे-दसः। यथा न क्रव्या अमृतः सजूरसस्तत्ते कृणोमि तदु ते समृ-ध्यताम्। शिवे ते स्तां द्यावापृथिवी असन्तापे अभिश्रियौ। शं ते सूर्य आतपति शं वातो वातु तेहृदे। शिवा अभिक्षरन्तु त्वा आपो दिव्याः पयस्वतीः। शिवास्ते संत्वोषध य उत्वाहार्षमधरस्या उत्तरां पृथिवीममि। तत्र त्वादित्यो रक्षतां सूर्याचन्द्रमसावुभा। यत्ते वासः परिधानं यान्नावं कृणुष्वे त्वम्। शिवं ते तन्वे ३ तत्कृणमः संरयशो-द्रूक्ष्णगस्तु ते। यत्क्षुरेणमर्चयता सुतेजसा वप्ता वपसि केशश्मश्रु। शुभं मुखं मान आयुः प्रमोषीः। शिवौ ते स्तां व्रीहियवा ववलासा वदोमधौ। एतौ यक्ष्मं विबाधेते एतौ मुञ्चतौ अंहसः। यदश्नासि यत्पिबसि धान्यं कृष्याः पयः। यदाद्यं यदन्ताद्यं सर्वं ते अन्नमविषं कृणोमि। अह्ने चत्वारा त्रये चोभाभ्यां परिदधमसि। अरायेभ्यो जिघत्सुभ्य इमं मे परिरक्षधः। शतं ते युतं हायनां द्वे युगे त्रीणि चत्वारि कृणमः। इन्द्राग्नी विश्वेवास्ते नुमन्यन्तामहृणीयमाणाः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शरदे त्वा हेमन्ताय वसन्ताय ग्रीष्माय परिदध्मसि। वर्षाणि तुभ्यं स्योनानि येषु वर्धन्त ओषधीः। मृत्युरीशे द्विपदां मृत्युरीशे चतुष्पदाम्। तस्मात्त्वां मृत्योर्गोपतेरुद्धरामि स मा बिभेः सोरिष्ट न मरिष्यसि न मरिष्यसि मा बिभेः। न वै तत्र प्रमीयन्ते नो यन्त्यधमं ततः। सर्वो वै तत्र जीवति गौरश्वः पुरुषः पशुः। यत्रेदं ब्रह्म क्रियते परिधिर्जीवनायकम्। परि त्वा पातु समानेभ्यो अभिचारात्सबन्धुभ्यः। अपम्रिर्भवामृतोतिजीवोवात्तेहासिषुरसवः शरीरम्। ये मृत्यव एकशतं यानाष्ट्रा अतितार्याः। मुञ्चन्तु तस्मात्त्वां देवा अग्नेर्वैश्वानरादधि। अग्नेः शरीरमसि पारयिष्णू रक्षोहासि सपत्नहा। अथो अमीवचातनः पूतुर्द्रुर्नामभेषम्। प्राणाय नमो यस्य सर्वमिदं वसो यो भूतः सर्वस्येश्वरो यस्मिन्सर्वं प्रतिष्ठितम्। नमस्ते प्राणक्रन्दाय नमस्ते स्तनयित्नवे। नमस्ते प्राणविद्युते नमस्ते प्राणवर्षते। यत्प्राणस्तनयिन्तुनामिक्रन्दत्योषधीः। प्रवीयते गर्भं दधत्तेथो बह्वीर्विजायन्ते। यत्प्राणात्रावागते अभिक्रन्दत्योषधीः। सर्वं तदा प्रमोदते यत्किं च भूम्यामधि। यदा प्राणो अभ्यवर्षीद्वर्षेण पृथिवीं महीम्। पशवस्तत्प्रमोदन्ते महो वैस्तैनो भविष्यति। अभिवृष्टय ओषधयः प्राणेन समवादिरन्। आयुर्वै नः प्रातीतरः सर्वा नः सुरमीरकः। नमस्तेअस्त्वायते नमो अस्तु परायते। नमस्ते प्राण तिष्ठ आसीनायोतत्ते नमः। नमस्ते प्राणाप्राण ते नमो अस्त्वापानते पराचीनाय ते नमः प्रतीचीनाय ते नमः सर्व्वस्मै त इदं नमः। या ते प्राणप्रिया तनूर्या ते प्राणप्रेयसी। अथोयद्भेपजं तव तस्य नो धेहि जीवसे। प्राणप्रजा अनुवस्ते पिता पुत्रमिव प्रियम्। प्राणो ह सर्वस्येश्वरो यच्च प्राणति यच्च न। प्राणो मृत्युः प्राणस्तव आत्प्राणं देवा उपासते। प्राणो ह सत्यवादिनमुत्तने लोक आदयन्। प्राणो विराट् प्राणो देष्ट्री प्राणं सर्वं उपासते। प्राणे ह सूर्यश्चन्द्रमाः प्राणमाहुः प्रजापतिम्। प्राणापानौ व्रीहियवोवनड्वान्प्राण उच्यते। यवे ह प्राण आहितो अपानो व्रीहिरुच्यते। अपानति प्राणति पुरुषो गर्भे अन्तरा। यदा त्वं प्राणजिन्वस्यथ स जायते पुनः। प्राणमाहुर्मातरिश्वानं वातोह प्राणउच्यते। प्राणे ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम्। आथर्वणीराङ्गिरसीर्दैवीर्मनुष्यजा उत। ओषधयः प्रजायंते यदा त्वं प्राण जिन्वसि। यदा प्राणो अभ्यवर्षीद्वर्षेण पृथिवीं महीम्। ओषधयः प्रजायन्तेऽथो याः काश्च वीरुधः। यस्ते प्राणेदं वेद यस्मि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्चासि प्रतिष्ठितम् । सर्वे तस्मै बलिं हराऽमुष्मिँल्लोकमुत्तमे । यथा प्राण बलिहृतस्तुभ्यं सर्वाः प्रजा इमाः । एवाबलिं हरान्यस्त्वा श्रृणत्सुश्रवः । अन्तर्गर्भश्चरति देवतास्वाभूतो भूतः स उ जायसे पुनः । सभूतो भव्यं भविष्यत्पिता पुत्रं प्रविवेशाशचीभिः। एकं पादं नोत्खिदति सलिलाद्धंस उच्चरत् । यदंगसतमुत्खिदेन्नैवाद्य न श्वं स्यान्न रात्री नाहः स्यान्न व्युच्छेत्कदाचन । अष्टावक्रं वर्तत एकनेमि सहस्राक्षरं प्रपुरोनिपश्चात । अर्धेन विश्वं भुवनं जजान यदस्यार्द्धं कतमः स केतुः । यो अस्य विश्वस्य जन्मन ईशे विश्वास्य चेष्टतः। अन्येपु क्षिप्रधन्वने प्राण नमोऽस्तुते । यो अस्य सर्वस्य जन्मन ईशे सर्वस्य चेष्टतः । अतन्द्रो ब्रह्मणा धीरः प्राणो मा नु तिष्ठतु । उर्ध्वः सुप्तेषु जागार ननु तिर्यङ् निपद्यते । न सुप्तमस्य सुप्तेष्वनु शुश्राव कश्चन । प्राणमामत्यया वृत्तो तदमन्यो भविष्यति । अपां गर्भमिव जीवसे प्राण वध्नामि त्वामयि । इत्यायुष्यगणः। ॥ २५ ॥ विषासहिं सहमानं सासहानं सहीयांसं । सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितं । ईड्यं नामव्ह इन्द्रमायुष्मान् भूयासं । विषासहिमिति संपूर्णः पुनः । ईड्यं नामव्हइन्द्र प्रियोदेवानां भूयासे । विशासहिं० ईड्यं० इन्द्रप्रियः प्रजानां । विशा० ईड्यं० इन्द्र प्रियः पशूनां० । विशा० ईड्यं० इन्द्रंप्रियः समानानां० । उदिह्युदिहि सूर्यवचसामाभ्युदिहि । द्विषंश्च मह्यं ऋध्यतुमाचाहं द्विषतेरन्धं । तवे द्विष्मो वहुधा वीर्याणि त्वं नः प्रणीहि पशुभिर्विश्वरूपैः सुधायां मधेहि परमे व्योमन् । उदिह्युदियांश्च पश्चामियांश्च तेषु मा सुमतिं कृषितवे० त्व न प्रा० मा त्वा दमन् लले अप्स्वं १ तर्मे पासिन उपतिष्ठन्त्यत्र त्वं त इन्द्रोतिभिः शिवाभिः शंतमो भव । आरोहंस्त्रिदिवं दिवो गृणानः सोमपीतये प्रियधामास्वस्तये तवे० त्वंन० ॥ १० ॥ हि त्वा शर्स्ति दिवसा रुक्षमेतां स नो मृडसुमतौ ते स्याम । तवे० त्वं न० । त्वं न इन्द्रमहते सौभगायादब्धेभिः परियाह्यक्तुभिस्तवे० त्वमिन्द्रासि विश्वजित्सर्ववित्पुरुहूतस्त्वमिन्द्रात्वमिन्द्रेमंसुहवंस्तोममेरयस्व स नो मृडसुमतौ ते स्याम तवे द्वि० त्वं न० प्र० । अदब्धो दिवि पृथिव्यामुतासि न त आयुर्महिमानमन्तरिक्षे । अदब्धे न ब्रह्मणा वा वृधानः। स त्वं न इन्द्र दिवि शं शर्म यच्छ तवे द्वि० त्वं नः० । यात इन्द्र तनूरप्सु या पृथिव्यां यान्तरग्नौ या त इन्द्र पवमाने स्वर्विदि ये व्रतन्वन्त-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिक्षं व्यापिथ तया न इन्द्र तन्वा उ शर्म यच्छ तवे द्वि० त्वंनः०। त्वा-
मिन्द्र ब्रह्मणा वर्द्धयन्तः सत्रं निषेदुर्ऋषयो नाधमानास्तव्वेद्वि० त्वं न०।
त्वततृत्वं पर्येष्युछं सहस्रधारं विदथं स्वर्विदं तवे द्वि० ५ त्वं न० रक्षसे
प्रदिशश्वतस्रस्त्वं शोचिषा नभसि विभासि। त्वमिमा विश्वा भुवनानि
तिष्ठ स ऋतस्य पन्थामन्वेषि विद्वांस्तवे० त्वंन ६। पञ्चभिः पराङ् त-
पस्ये कया वाङ् शस्ति मे सुदिभे वाधमानस्तवेद्वि० त्वंन. ७ त्वमिन्द्रस्त्वं
महेन्द्रस्त्वं लोकस्त्वं प्राजापतिः तुभ्यं यज्ञो विजायते तुभ्यंजुह्वन्ति जुह्व-
तस्तवे द्वि० त्वं न० ८ असति सत्प्रतिष्ठितं सति भूतं प्रतिष्ठितं। भूतं-
ह भव्य आहितं भूतं भव्ये प्रतिष्ठितं तवेद्वि० त्वंन० पृणाहि पशुभिर्वि-
श्वरूपैः सुधायां मा धेहि परमे व्योमन् ॥ ९ ॥ शुक्रोसि भ्राजोसि।
यथा त्वं भ्राजता भ्राजोस्येवाहं भ्राजता भ्राज्यासं रुचिरसि रोचोसि।
स यथा त्वं रुच्यारोचोस्येवाहं पशुभिश्च ब्राह्मणवर्चसेन च रुचिषीय।
उद्यते नम उदायते नम उदिताय नमः। विराजे नमः स्वराजे नमः
संम्राजे नमः। अस्तंयते नमोस्तमेष्टा ते नमोस्तमिताय नमः विराजे
नमः स्वराजे नमः सम्राजे नमः। उदगादयमादित्यो विश्वेन सहसा सह।
सपत्नान्मत्यं रन्धयन्माचाहं द्विषतेरधं तवेद्वि० त्वंनः आदित्यनावमारुक्षः
शतारित्रां स्वस्तये। अहर्मात्यपीपरो रात्रिं सत्रातिपारय। सूर्यनावमारुक्षः
शतारित्रां स्वस्तये रात्रिं मात्यपीपरोहः सत्रातिपारय। प्रजापतेरावृतो
ब्रह्मणा वर्मणा ह कश्यपस्य ज्योतिषा वर्चसा च। जरदष्टिः कृतवीर्यो
विहायाः सहस्रायः सुकृतंश्चरेयं परीवृतो ब्रह्मणा०। मामाप्रायं निषवो-
दैव्याय मामनुषीरवसृष्टा वधाय। ऋतेन गुप्त ऋतुश्च सर्वैर्भूतेन गुप्तो
भव्येन चाहम्। मामाप्रापत्याप्मामोतमृत्युरन्तर्ददेऽहं सलिले तवावः।
अग्निमागोप्ता परिपातु विश्वत उद्यत्सूर्यो नुदतां मृत्युपाशात्। व्युच्छती-
रुशसः पर्वता ध्रुवाः सहस्रं प्राणामप्यायन्तं ताम् ॥ इत्यायुष्यगणः।
अथ सर्वस्य गणः। ये त्रिसप्ताः परियन्ति विश्वारूपाणि बिभ्रतः।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे। पुनरेहि वाचस्पते देवेन
समनसा सह। वसोष्यते निरमयमप्येवास्तु मयि श्रुतम्। इहैवाभि-
वितनुते आर्त्नी इव ज्यया। वाचस्पतिर्नियच्छतु मय्येव०। उप-
हूतो वाचस्पतिरुपास्मान्वाचस्पतिर्ह्वयतां संश्रुतेन गमेमहिमाश्रुतेन
विराधिषि। अस्मिन्वसुवसवो धारयन्त्विन्द्रः पूषा वरुणो मित्रो अग्निः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इममादित्या उत विश्वे च देवा उत्तरस्मिन् ज्योतिषि धारयन्तु । अस्य देवाः प्रदिशि ज्योतिरस्तु सूर्यो अग्निरुत वा हिरण्यं सपत्ना । अस्मदधरे भवन्तूत्तमं नाकमधिरोहयेमम् । येनेन्द्राय समरभः पयांस्युत्तमेन ब्रह्मणा जातवेदः । तेन त्वमग्न इह वर्धयेमं सजातानां श्रैष्ठ्या आधेह्येनम् । ऐशां यज्ञमुत वर्चोदहेहं रायस्पोषमुत वित्तान्यग्रे । अपत्ना अस्युयेमम् । प्रातरग्निं प्रातरिन्द्रं हवामहे सप्त ऋचः ॥ ७ ॥ प्रथमायां द्वितीयां हुवे मेत्यत्र हुवामहे । उतोदितौ मघवन् । अस्तु देवस्तेना वयम् । वसुविदं भगं मे । हस्तिवर्चसं पृथतां वृहद्यशो अदित्यायस्तन्वःसंबभूव तत्सवे समदुर्मह्यमेतद्विश्वेदेवा अदितिः सजोषाः । मित्रो वरुणश्चेंद्रो रुद्रश्च चेततुः । देवासो विश्वधायसस्तेमां यन्तु वर्चसा । येन हस्तीवर्चसा संबभूव येन राजा मनुष्येष्वश्वतः । येन देवा देवतामग्रआयंतेन माम-द्यवर्चसाग्रे वर्चस्विनं कृणु । यत्ते वर्चो जातवेदो बृहद्भवत्याहुतेः । यावत्सूर्यस्य वर्च आसुरस्य च हस्तिनः । तावन्मे अश्विना वर्च आधत्तां पुष्करस्रजा । यावच्चतस्रः प्रदिशश्चक्षुर्यावत्समनुते । तावत्समौत्वैन्द्रियं मयि तद्धस्तिवर्चसम् । हस्तीमृगाणांछुषदामतिष्ठावान्बभूव हि । तस्य भगेन वर्चसाभिषिञ्चामि मामहम् । सिंहे व्याघ्र उतयापृदाकौस्त्विरग्नौ ब्राह्मणोसूर्येया । इन्द्रं या देवी० सा न ऐतु वर्चस० यशो हविर्वर्धता-मिन्द्रजूतं सहस्रवीर्यं सुभृतं सहस्कृतम् । यः प्रसरस्राणमनुदीर्घाय चक्षसे हविष्मन्तं मावर्धय ज्येष्ठतातये । अच्छाम इन्द्रयशसं यशोभिर्यशस्विनं नमसा माविधेम नोरास्वमिन्द्रजूतं तस्य ते रीतौ यशस्यामयशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत । यशा विश्वस्य भूतस्याहमस्मि यश-स्तमः । यशसं मेन्द्रो मघवान् कृणोतु यशसं द्यावापृथिवी उभे इमे । यशसं मा देवः सविता कृणोतु प्रियो दातुर्दक्षिणाया इह स्याम् । यथेन्द्रो द्यावापृथिव्योर्यशस्वान् । यथापओषधीषु बिभ्रती । एवाविश्वेषु देवेषु वयं सर्वेषु यशसः स्याम । इन्द्रो यशा अग्नि० गिरावरगराटेषु हिरण्ये गोषु यद्यशः । सुरायां सिच्यमानायां कीलालोऽथो मधु तन्मयि । अश्विना सारघेण मा मधुना तं शुभस्पती । यथा मर्मस्वती वाचमाव-दामि जना ९अनु । मयि वर्चो अथो यशोऽथो यज्ञस्य पत्नयः । तन्मयि प्रजापतिर्दिवि द्यामिव दहतु । यथा सोमः प्रातःसवने अश्विनोर्भवति प्रियः । एवामे अश्विना वर्चसात्मनि ध्रियताम् । यथा सोमो द्वितीये सवन इन्द्राग्न्योर्भवति प्रियः । एवाम इन्द्राग्नी वर्च आत्मनि ध्रियताम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथा सोमस्तृतीये सवन ऋभूणां भवति प्रियः। एवामे ऋभवो वर्चश्च ध्रियताम्। यद्गिरिषु पर्वतेषु योऽश्वेषु यन्मधु। सुरायां सिच्यमानायां यत्तत्र मधु तन्मयि। अश्विना सारघेण वा मधुनांगंऽशुभस्पती। यथा वर्चस्वतीं वाचमावदानि जनां अनु। स्तनयित्नुस्तेवाक् प्रजापते वृषा शुष्मं क्षिपसि भूम्यां दिवि। तां पशव उपजीवन्ति सर्वे ते नो शेषमूर्जं पिपर्त्ति। पृथिवी दंडोन्तरिक्षं गर्भो द्यौः कषा विद्युत्प्रकषो हिरण्ययो बिंदुः। ये वै कषायाः सप्तमधूनि वेद मधुमान् भवति। ब्राह्मणश्च राजा च धेनुश्चानड्वांश्च व्रीहिश्च यवश्च मधु सप्तमं। मधुमान् भवति मधुमदस्याहार्यं भवति। मधुमतो लोकान् जयति य एवं वेद यद्वीध्रेस्तप्रयति प्रजापतिरेव तत्प्रजाभ्यः प्रादुर्भवति तस्मात्प्राचीनोपवीतस्तिष्ठेत्प्रजायते तु मा वुध्यस्वेति। अन्वेने प्रजा अनुप्रजापतिर्बुध्यते य एवं वेद। यच्च वर्चो असेषु सुरायां च यदाहितं। यद्गोष्वश्विना वर्चस्तेन मां वर्चसावतं। येन महानघ्न्याजघनमश्विना येन वा सुरा येनाक्षा अभ्यसिच्यन्ते तेनेमां वर्चसावतम्। योनिध्मोदीदयदश्वान्तर्यं विप्रास ईल्नते। अध्वरेषु। अपां नयन्मधुमतीरपो दायाभिरिन्द्रो वावृधे वीर्यावान इदमहं रूपं तं ग्राभं तनूं दूषिमपोहामि यो भद्रो रोचनस्तत्तुदवामि। आस्यै ब्राह्मणास्तपनीर्हरंत्ववीरघ्नीरुदजन्त्वापः। अर्यम्णो अग्निं पर्येतु पूषन्प्रतीक्षन्ते श्वशुरो देवरश्च। शतं ते हिरण्यं शमुशन्त्वापः। शं मे धिर्भवतु शं युगस्य तार्घ्रशं त आपः शतपवित्र्या भवन्तु संपत्यात्तन्वं संस्पदस्व। वर्चस्यगणः समाप्तः। अमूः पारे पृषदाक्वस्त्रिषप्तानिर्जरायवः। तासां जरायुभिर्वरमाक्षामयिव्ययामस्यथापोपरिपंथिनविशूच्येतुर्कतती पिनाकमिव बिभ्रती विष्वकूपुनर्भुवाम नो असमृद्धा अघायवेन वहवः समेवेकं नार्भका अभिदाधृशुः। वेणोरङ्गा इवाभि नो मा मृद्धा अघायवः। प्रेषौ प्रस्फुरन्तं वहतं पृणतो गृहात्। इन्द्राण्येतु प्रथमाडीतामुषिता पुरः। पातं न इन्द्रापूषणादितिः पान्तु मरुतः। अपांनपात्सिन्धवः सप्तपातन उपातु नो विष्णुरुत द्यौः प्रपातं नो द्यावापृथिवी अभिष्टये। पातु ग्रावा पातु नो मोनोअंहसः पातु नो देवी सुभगा सहस्वती रात्वग्निः शिवा ये अस्य पायकः। पातं नो देवाश्विना शुभस्पती उषासानक्तोतन उरुष्यताम्। अपांनपादभिरुती गयस्यचिद्देवत्वष्टर्वर्धय सर्वतातये। त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः। पुत्रैर्भ्रातृभिरदितिं नोनुपादनो दुस्तरं त्रायमाणं सहः। येन सोमादितिः यथा मित्रवाचेत्यद्रुहः। तेना-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नोवसागहि । येन सोमसाहन्त्यासुरां रन्धयासि नः । तेनानो अतिवो-
चतानः । येन देवा असुराणामोजांस्यवृणीध्वम् । तेनानः शर्म यच्छथ ।
यथा वृक्षं जिंवुजासमंतं परिशस्वत्ते । एवापरिश्वपस्य मां यथा मां कामि-
न्यस्यो यथा मां नापगा असः । नमो देवदेवेभ्यो राजवधेभ्यः । यथो यं
विष्यानां वधास्तेभ्यो मृत्यो नमोस्तु ते । नमस्ते अधिवाकाय परावाकाय
ते नमः । सुमत्यै मृत्यो तेन मोड्डुमृत्यो न इदं नमः । नमस्ते यातुधानेभ्य
नमस्ते भेषजेभ्यः । नमस्ते मृत्योमूलेभ्यो ब्राह्मणेभ्य इदं नमः । अभयं
मित्रावरुणाविहास्तु नो अभयं सोमसविता नः कृणोतु । अभयं नोस्तू १
वैंन्तरिक्षं सप्तऋषीणां च हविषाऽभयं नो अस्तु । अनमित्रं नो अधराद-
नमित्रं न उत्तरात् । इद्रासमित्रं नः पश्चादनमित्रं पुरस्कृधि । उपप्रागा-
त्सहस्राक्षो युक्त्वाशयथो रथम् । शप्तारमन्विच्छन्मवृक इवापि वृतो गृहे ।
परिणो वृश्चिशपथहृदमग्नीरिवादहन् । यप्तारमत्र नो जहि दिवो वृक्षमि-
वाशनिः । यो नः शपादशपतो यश्च नः शपतः शपात् । वृक्ष इव विद्युता
हत आमूलादनुशुष्यतु । अनमित्रं नो अधरादनमित्रं न उत्तरात् । इद्रास-
मित्रं नः पश्चादनमित्रं पुरस्कृधि । मनसे चेतसे धिय आकूतय उत
चित्तये । मत्यै श्रुताय चक्षसे विधेम हविषा वयम् । अपानाय व्याना-
य प्राणाय भूरिधायसे । सरस्वतया उरुव्यये विधेम हविषा वयम् ।
यमो मृत्युरघमारो निर्ऋत्यो बभ्रुभ्रुवोस्रानीलशिखंडः । देवजनाः
सेनयाओं तस्थिवांसति अस्माकं परियन्तु वीरान् । मनसा होमैर्हविषा
घृतेन पर्यायास्त्र उत राज्ञे भयाय । नमस्येभ्यो नमस एभ्यः कृणोम्य-
न्यात्रास्मद्यविषा नयन्तु । त्रायध्वं नो अद्यविषाभ्यो वधाद्विश्वे देवा मरु-
तो विश्ववेदसः । अग्नीषोमावरुणः पूतदक्षावातापर्जन्ययोः सुमतौ स्यामः ।
वृहस्पतिम० त्यमृषु० त्रातारमिह० इन्द्रः सुत्रामा । अभयं नः कृणो-
त्विति विशेषः । मसुत्रामास्ववां० तस्यवयं । विपरीते १ आमन्द्रैरिन्द्र-
हरि०वर्म मे द्यावापृथिवी वर्माहर्वर्मसूर्यः । वर्म मे विश्वेदेवाः क्रन्मामा-
प्रायत्प्रथीचिकाः । ऐन्द्राग्नं वर्म वहुलं विश्वेदेवा नातिविध्यंति सर्वे ।
तन्मे तन्त्रं त्रायतां सर्वतो वृहदायुष्माञ्जरदष्टिर्यथा सत् । गिरयस्ते
पर्वतसहिमवन्तोरण्यते पृथिविस्योननमस्तु । भुवं कृष्णां रोहिणीं
विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् । यत्रेमध्यं पृथिवी यत्र नभ्यं
यास्तदुर्जस्तन्वः संबभूवुस्तासुधेह्यभि नः पवस्व माता भूमिः पुत्रोरहं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पृथिव्याः। यास्ते प्राचीः प्रदिशो या उदीचीर्यास्ते भूमे अधरायाश्च पश्चात्। स्योनाजास्ता मह्यं चरते भवन्तु मा नियप्तं भुवनेषु श्रियाणः॥ १॥ मा नः पश्चान्मा पुरस्तान्नुदिष्ठोत्तरादधरादुत स्वस्ति भूमे नो भव। मा विदन्परिपन्थिनो वरीयो या वर्यावर्धम्। स्वस्त्ययनगणः। स्वस्तिदा विशांपतिर्वृत्रहा १ ब्राह्मणेन पर्युक्तासि कण्वेन तार्षदेन। सेनेवैसि त्विषीमति ततमभ्ययमस्तिरयत्रप्राप्नोस्योषधे॥ १॥ न ताअ-र्वारेणु० १ अभयं मित्रावरुणा० १ अभयं द्यावापृथिवी इहास्तुनोर्वि-षात्रिणोनुददतं नः प्रतीचः। मा ज्ञातारं मां प्रतिष्ठां विन्दत मिथो विघ्नानाउपयन्तु मृत्युं २ हतंतर्द समं कुमाखुपश्विनाच्छिन्नं शिरो अविपृष्ठीश्रिणीतम्। यवान्नेददनयिनह्यतं मुखं मथाभयं कृणुतं धाप्याय १पूषे। मा आसइन्द्रः सुत्रामा१ मैवं यथामनुगा भीम एषा येन पूर्वं येयथ तं यवीमि। तम एतत्पुरुषमाप्रपत्यामयं परस्तादभयं ते अर्वाक्१ स्वस्तिदा विशांपतिः १ नमस्ते घोषिणीभ्यो नमस्ते केशिनीभ्यो नमोनमस्कृ-ताभ्यो नमः संभुंजतीभ्यः। आतेराष्ट्रमिह रोहितो हाषीव्यास्तवन्मृधो अभयं ते अभूत्। तस्मै ते द्यावापृथिवी रेवतिभिः कामं इहाथा-मिहशक्करीभिः १ इदमुक्रेयो वसानमागां शिवे मे द्यावापृथिवी अभूताम्। असपत्नाः प्रदिशो भवन्तु न वै त्वा द्विष्मो अभयं नो अस्तु। यत इन्द्र भयामहे० ऊतिभिः। अभयगणः। मानो विदन्वि-व्याधिनो मो अभिव्याधिनो विदन्। आरात् शरव्या अस्मद्विषूची-रिन्द्र पातय। विष्वञ्चो अस्मच्छरवः पतन्तु ये यस्ता ये वास्याः। देवीर्मनुष्येषवो ममामित्रान्विवध्यत। यो न स्वो यो अरणः स जात उ निष्ट्यो यो अस्मां अभिदासति। इन्द्रः शरव्यैतान् ममामित्रोन्वि-विध्यतु यः सपत्नो योऽसपत्नः यश्च द्विषच्छपातिनः। देवास्तं सर्वे धूर्वन्तु० ४। अदारसृद्भवतयो० १ यो अद्य सेन्यो वधोद्यापुनासुदीरते। युवन्तं मित्रावरुणावस्य द्यावयन्तं परि १ इदश्च पदमुतश्च यद्ध्रुवं वरुणया-वयः। विमहच्छर्म यच्छ वरीयोयावयावधम्। शास इत्यामह्यं अमित्रसाहो अस्तृतः। नयस्य० ४ स्वस्तिदा विशांपति० १ विनइन्द्र० १ अमथसंगम या तमो यो अस्मां अभिदासति। पादव्यत्ययः। विरसो विमृ०। अयेन्द्र द्वि० विमहःशर्म० संसीतंम इदं ब्रह्मसंशितं वीर्यं १ बलं संशितं क्षत्रेम-जरमस्तजिष्णुर्मेषामस्ति पुरोहितः समहमेषां राष्ट्रं स्यामिसमोजो वीर्यं बलम्। वृश्चामि शत्रूणां बाहूननेन हविषाहम्। निवैयद्यंतासधरे भवन्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ये नः सूरिमघवानं पृतन्यात् । क्षणामि ब्रह्मणा मित्रानुन्नयामि स्वान-ह्म् । तीक्ष्णीयांसः परशोरग्नेस्तीक्ष्णतरा उत । इन्द्रस्य वज्रात्तीक्ष्णी-यांसो येषामस्मि पुरोहितः । एषामहमायुधासंस्यामेषां राष्ट्रं सुवीरं वर्ध-यामि । एषां क्षत्रमजरमस्तु जिष्ण्वे१शां चित्तं विश्वे भवन्तुरेवाः । उद्धर्षन्तां मघवन्वाजिनान्युद्वीराणां जयतामेतु घोषाः । पृथयोशा ३ लूलयः केतुमन्त उदीरतम् । दिवा इडज्येष्ठा मरुतो यन्तु सेनया । प्रेताजयतानरवः सन्तु वाहवः । तीक्ष्णेषवो बलधन्वनो हतोग्रायुधा अवलानुग्रबाहवः । अवसृष्टा परापतशरव्ये ब्रह्मसंशिते । जयामित्रा-न्प्रपद्यस्व नैषा वरं वरं मामीषां मोचि कश्चन । त्वया मन्यो सरथा मारुजन्तो हर्षमासोः । संशितामरुची इति विशेषः । सूक्तं० । यस्ते मन्योविदधद्वज्रसायक स ह उतः पुष्यति विश्वमानुषक् । साह्यामदा-समार्यं त्वया युजा वयं सहस्पृतेन सहसा सहस्वता । एता देवसेनाः सूर्यकेतवः सचेतसः । अभिवां नो जयन्तु स्वाहा । अवमन्युरवायताव-वाहू मनोयुजाः । पराशर त्वं ते सांपरां नो युष्म वर्धयातुधानो रयि-माकृधि । निर्हस्तेभ्यो नैर्हस्तयं देवाः शरुमनुष्यथा वृश्चामि शत्रूणां बाहूननेन हविषाहम् । इन्द्रश्च गारप्रथमं नैर्हस्तममउनेभ्यः । जयं उ स त्वा नो मम स्थिरेणेन्द्रेण मेदिना । निर्हस्तः शत्रुरमिदासंनस्तुर्ये से-नाभिर्वधमायन्त्वास्मान् । ममर्पयेन्द्रं महता वधेन द्रात्वेषामङ्गहारो विविद्धः १ आतन्वाना आयच्छन्तो स्यंतो ये चृ धावता निर्हस्ताः शत्रवः स्थनेंद्रो बोद्धपराशरैः । निर्हस्ताः शत्रवः स्थनोङ्गैषां ग्लापयामसि । यथै-षामिन्द्र वेदांस्यतशो विभजामहै । परिवर्त्मानि सर्वत इन्द्रः पूषा चत-स्तृतुः । मह्यं त्वद्यामूः सेना अमित्राणां परस्पराम् । मूढा अमित्राश्चर-ताशीर्षाणा इवांहयः । तेषां वोअग्निमूढानामिन्द्रो हन्तु वरंवरम् । ऐषु-नह्यवृशाजिनं हरिणस्माभियं कृधि । पराङसित्रएषत्वर्वाची गौरुपेसतु । अभिभूर्यज्ञो अभिभूरग्निरभिभूः सोमो अस्मभ्यं हविश्वाः । पृथतना यथासान्येमाविधेमानिर्होशइदं हविः स्वधास्तु मित्रावरुणा विपश्चिता प्रजावत् क्षत्रं मधुवनेहपिन्वतम् । बाधेथां दूतिं निर्ऋतिं परातैः कृतं चितेन प्रमुमुग्ध्यास्मत् । इमं वीरमनुहर्षत्वमुग्रमिन्द्रसखायो अनुसंर-भध्वम् । ग्रामजितं गोजितं वज्रबाहुं जयं तमयाप्रमृणं तमोजसा । इन्द्रो जयातिजयराजयाता अधिराजो राजसुराजयातै । चर्कृत्य ईड्यो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वन्द्यश्चोपसद्यो नमस्यो भवेह । त्वमिन्द्राधिराजः श्रवं सुरत्स्वंभूरभि-
भूतिर्जनानां त्वं दैवीर्विष इमाविराजायुष्मत् क्षत्रमजरं ते अस्तु ।
प्राच्यादिशस्त्वमिन्द्रासि राजोतोदीच्यादिशोच्छोछत्रुहोसि यत्र यंति-
स्रोत्योस्तज्जिदंतेदक्षिणतो वृशभ एशिहव्यः अजित्वेन्द्रवरिमतः पुरा त्वां
हूरणाद्धुवे । ह्वयाम्युग्रं चेत्तारं पुरुषाणां मामेकजम् । यो अद्यसेत्यो वधो
जिघांसं न उदिते । इन्द्रस्य तत्र बाहू समंतं परिदध्मः परिदध्म इन्द्रस्य
बाहू समंतं त्रायतुस्त्रायतांह्वः । देवसवितः सोमराजं सुमनसं मा कृणु
स्वस्तये। अपराजितगणः। यः सपत्नो यश्च द्विंषंछपातिनः । देवास्तं सर्वे
धूर्वन्तु ब्रह्म० । शर्म्मवर्म्मैतदाहरास्यैनार्या उपस्तरे सिनीवालिप्रजायतां
भगस्य सममाअसत् । उद्वहुर्म्मिः शम्याहन्त्वायोयाक्राणिमुञ्चत ।
मादुष्कृतौव्येनसावश्यावशुनमारता । अघोरचक्षुरपतिघ्नीस्योनाश-
ग्मासुशेवासुयमागृहेभ्यः । वीरसूर्देवकामासत्वयीधिषीमहि सुमनस्य-
माना । इतश्च यदमुतश्च यद्वधं वरुणयावय । विमहच्छर्म यच्छ वरीयो
यावयावधम् । अपेन्द्रद्विष० जासतो वधं० विमच्छर्मन्यूयं नः प्रवतो
नयान्मरुतः सूर्यत्वचसः । शर्म यच्छायशप्रथाः । इममग्न आयुषे वर्चसे
नय प्रियं रेतो वरुणमित्र । माते० । तिस्रो देवीर्महि नः शर्म यच्छतु
प्रजायै नस्तन्व ३ यच्छ पुष्टम् । माहास्महि प्रजया० । उरुव्यचाना
महिषः शर्म यच्छत्वस्मि० इन्द्रस्य शर्म्मासि । तन्त्वा प्रपद्ये तं त्वा प्रवि-
शामि सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मे स्थितेन । अश्मवर्म
मेसि यो मा प्राच्यादिशोऽघायुरभिदासात् । एतत्सा ऋछात् । यो
मां दक्षिणामाः । यो मा प्रतीच्याः० यो मोदीच्याः । यो मा ध्रुवायाः ।
यो मोर्ध्वायाः० बृहता मन उपह्वये मातरिश्वना प्राणापानौ । सूर्याच्च-
क्षुरन्तरिक्षाच्छ्रोत्रं पृथिव्या शरीरम् । येन देवा असुराणामोजांस्यवृ-
णीध्वं तेनानः शर्म्म यच्छथ । यथा वृक्षं जिवुजासमं तं परिषस्वजे ।
एवापरिष्वजस्व मां यथा मां कामिन्यः सोयथामन्नायगा असः । यथेमे
द्यावापृथिवी सद्यः पर्येति सूर्यः । एवापर्येमि ते मनो यथा मां काम०
यथा सुपर्णाः प्रपन् पक्षौ निहन्तिभूम्यम् । एवानिहन्मि ते मनो यथा मां
काम० वांछ मे तन्व ३ यदौवाछाक्षौ ३ वांछिशवथ्यौ । अक्षौ वृषण्यन्त्याः
केशा मान्ते कामेन शुष्यन्तु । मम त्वा दोषणिः श्रिशं कृणोमि हृदयश्रि-
शम् । यथावतः परागसौ मामुष्याहं कदाचन । अनड्डुद्भ्यस्त्वं प्रथमं धेनु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भ्यस्त्वमरुंधतिः । अधेनवे यवसे शर्म यच्छ चतुष्पदे । शर्म यच्छ त्वोषधिः सहदेवीररुंधती । करत्ययस्वंतंगोष्ठमयक्ष्मा उत पुरुषात् । निस्वरूपां सुभगामत्स्याददामि जीवलाम् । सा नो रुद्रस्यास्तां हेतिं दूरं नयतु गोभ्यः तनूष्टे वाजिं तन्वाश्मभ्य धावतु शर्म तुभ्यम् । अपह्नुतो महोधरुणाय यद्देवो दिवीव ज्योतिस्वामिमीयात् । वाजस्य तु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्य उपस्था उर्वा १ तरिक्षं सा नः शर्म त्रिवरूथं नियच्छात् । देवानां पत्नीरुशती० १ यच्छन्तु समाप्तौ । अधिब्रूहि मां रभथा सृजेम तवैव संसर्वहाया इहास्तु । भवाः शर्वौ मृडतं शर्म यच्छ मयसिध्यदुरितं धत्तमायुः । रक्षोहणं वाजि० १ स्वाक्ति मे द्यावापृथिवी स्वाक्ति मित्रो अकरयम् । स्वाक्ति मे ब्रह्मणस्पतिः स्वाक्ति सविताकरत् । वर्ममेद्यावापृथिवी स्वस्त्ययनोक्ता १ ऐन्द्राग्नं वर्म० १ इयमपि तत्र । वर्म मह्यमयं मणिः फालाज्जातः करिष्यति । पूर्णोमन्थेन मागम इन सह वर्चसा । मित्रः पृथिव्योदक्रामत्तां पुरः प्रणयामि वः । तामाविशतां प्रविशत सा वः शर्म च वर्म यच्छतु । वायुरन्तरिक्षेणोद० सूर्यो दिवो० चन्द्रमा नक्षत्रैरु० सोम ओषधीरु० यज्ञो दक्षिणाभिरु० समुद्रो नदीभिरु० ब्रह्म ब्रह्मचारिभिरु० इन्द्रो वीर्येणो० देवा अमृतेनो० प्रजापतिः प्रजापतिभिरु० अपन्यधु पौरुषेये बधं यमिन्द्राग्नीधीता सविता बृहस्पतिः । सोमो राजा वरुणा अश्विनायमः पूषास्मान्परिपातु मृत्योः । यानि चकार पुनरद्बृहस्पतिः । प्रजापतिर्मातरिश्वा प्रजाभ्यः । प्रदिशो यानि वसते दिशश्च तानि मे वर्माणि बहुलानि सन्तु । यत्ते तनूष्वनह्यं तदेवाधिराज्ञयोधेहि न इन्द्रो यचक्रे वर्म तदस्मान्पातु सर्वतः । वर्म मे द्यावापृथिवी स्वस्त्ययनोक्ता । अपसपत्नं पुरस्तात्पश्चान्नो अभयं कृतम् । सविता दक्षिण उत्तरान्मा शचीपतिः दिवो दित्या रक्षन्तु भूम्या रक्षन्त्वग्नयः । इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितः शर्म यच्छताम् । तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतः सन्तुवभीद्विपदाः ॥ ३ ॥ इति शर्म्मवर्म्मगणः । अथपूर्वोक्ता अशीत्युत्तरशतं श्लोकाः । सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते । आखण्डलोग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥ २ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सहिताः शेषो दिक्पालाः पान्तु ते सदा ॥ ३ ॥ रुद्रो धर्मो मनुर्दाक्षी रुचिः श्रद्धा तु पार्थिव । भृगुरत्रिर्वसिष्ठश्च सनकश्च सनन्दनः ॥ ४ ॥ सनत्कुमारश्च तथा भगवानपि चांगिराः । पुलहश्च पुलस्त्यश्च मरीचिः कश्यपः प्रभुः ॥५॥ एते त्वामभिषिञ्चन्तु प्रजाध्यक्षाः समागताः । प्रभाकरा वर्हिषदो अग्निष्वात्तास्तथैव च । क्रव्यादाश्चोपहूताश्च आज्यपाश्च सुकालिनः । एते त्वामभिषिञ्चन्तु पितरश्चाग्निभिः सह ॥ ७ ॥ लक्ष्मीर्वेदी शची ख्यातिरनसूया तथा स्मृतिः । संभूतिः सन्नतिश्चैव क्षमा प्रीतिस्तथैव च ॥ ८ ॥ स्वाहा स्वधा च ते राजन्नभिषिञ्चन्तु मातरः । कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिर्लक्ष्मीस्तथा क्रिया ॥ ९ ॥ बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः सिद्धिश्च पार्थिव । एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः ॥ १० ॥ अरुन्धती वसुर्यामी लंबा भानुर्मरुत्वती । संकल्पा च मुहूर्त्ता च साध्या विश्वा तथैव च ॥ ११ ॥ धर्मपत्न्यो दशान्यास्त्वामभिषिञ्चतु पार्थिव । अदितिर्दितिर्दनुः काला सुहृष्टानायुषा मुनिः ॥ १२ ॥ कद्रूः क्रोधवशा प्राची विनता सुरभिस्तथा । एतास्त्वामभिषिञ्चन्तु कश्यपस्य प्रियाः स्त्रियः ॥ १३ ॥ पत्नी ते वहुपुत्रस्य सुपुत्राया च भामिनि । समायात्वभिषेकाय विजयाय च पार्थिव ॥ १४ ॥ कृशाश्वपत्नी च तथा सुप्रभा तु जया तथा । सुदर्शना तयोः पुत्रो विजयं विदधातु ते ॥ १५ ॥ मनोरमा भानुमती विशाला या च बाहुदा । अरिष्टनेमिपत्न्यस्त्वामभिषिञ्चतु पार्थिव ॥ १६ ॥ कृत्तिका रोहिणी देवी विशाखा च तथा नृप । अनूराधा तथा ज्येष्ठा मूलं च वसुधाधिप ॥ १७ ॥ आषाढा च तथा पूर्वा तथान्या चोत्तराह्वया । अभिजिच्च तथा श्रव्या धनिष्ठा च तथैव च ॥ १८ ॥ तथा शतभिषक् चैव पूर्वाभाद्रपदा तथा । उत्तरा रेवती राजन् अश्विनी भरणी तथा ॥ १९ ॥ एतास्त्वामभिषिञ्चन्तु सोमपत्न्यः समागताः । मृगी च मृगचर्मा च श्वेतभद्रचरा हरिः । पूता च कपिता दंष्ट्रा सुरभा सुलभा तथा । एताः पुलस्त्यपत्न्यस्त्वामभिषिञ्चन्तु पार्थिव ॥ २१ ॥ श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री तथा शुकी । पत्न्यस्त्वामभिषिञ्चन्तु अरुणस्यार्कसारथेः । आयतिर्नियतिश्चैव रात्रिनिद्रा च पार्थिव । एतास्त्वामभिषिञ्चन्तु लोकसंस्थानहेतवः ॥ २३ ॥ उमा सेना शची चैव र्मोर्णा निर्ऋतिस्तथा । गौरी शिवा च बुद्धिश्च वलया चैव नन्दना ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ २४ ॥ आनृक्या च तथा ज्योत्स्ना या च देवी वनस्पतिः । एतास्त्वामभिषिञ्चन्तु कालस्यावयवाः शुभाः ॥ २५ ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः । ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । स्वायंभुवो मनोः पुत्रो मनुः स्वारोचिषस्तथा । औत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा । वैवस्वतोथ सावर्णो दक्षब्रह्मसुतावुभौ । धर्मपुत्रो रुद्रपुत्रो रौच्ये भौत्यश्च यो मनुः । एते त्वामभिषिञ्चन्तु मनवश्च चतुर्दश । विश्वभुग्विश्वपश्चित्रसुशान्तः सुसुखी विभुः । मनोजवस्तथौजस्वी बलिरंकतमान्तिकौ । वृषश्च कतिधामा च दिविस्पृक् शुचिरेव च । एते त्वामभिषिञ्चन्तु देवपालाश्चतुर्दश । रेवन्तश्च कुमारश्च तथा वर्चाः कुमारकः । वीरभद्रश्च नन्दी च विश्वकर्मा पुरोजवः । एते त्वामभिषिञ्चन्तु सुरमुख्याः समागताः । आत्मा ह्यासुमन्तो दक्षः पटुः प्राणस्तथैव च । हविष्यश्च गविष्ठश्च ऋतः सत्यश्च पार्थिव । अभिषिञ्चन्तु राजंस्त्वां देवा ह्यङ्गिरसो दश । क्रतुर्दक्षा वसुः सत्यः कालकामौ मुनिस्तथा । धृतिमान्मनुजश्चैव रोचमानस्तथैव च । एते त्वामभिषिञ्चन्तु विश्वेदेवास्तथा दश । अजैकपादहिर्बुध्न्यः पुष्पकेतुस्तथा बुधः । भरतश्च तथा मृत्युः कापालिरथ किंकिणिः । एकादशैते रुद्रास्त्वामभिषिञ्चन्तु पार्थिव । भुवनो भावनश्चैव सुजन्यः सुजनस्तथा । क्रतुः सुवर्णवर्णश्च व्यजश्च व्यसुतस्तथा । प्रसवश्चाव्ययश्चैव दक्षश्च मनुजाधिप । एते त्वामभिषिञ्चन्तु भृगवो नाम देवताः । मनो मरुश्च प्राणश्च नरोपानश्च वीर्यवान् । चितिर्हयो नयश्चैव हंसो नारायणस्तथा । विभुश्चापि दिविश्रेष्ठस्तथान्यश्च जगद्धितः । एते त्वामभिषिञ्चन्तु साध्या द्वादश पार्थिव । धाता मित्रोर्यमा पूषा शक्रोंशो वरुणो भगः । त्वष्टा विवस्वान्सविता विष्णुर्द्वादशमः स्मृतः । एते त्वामभिषिञ्चन्तु काश्यपा दितिसंभवाः । एकद्वित्रिचतुर्ज्योतिः पञ्चज्योतिस्तथैव च । एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः । इन्द्रश्च गत्या दृश्यन्ते ततः प्रतिसक्त्तथा । मितश्च संमितश्चैव अमितश्च महाबलः । ऋतजित्सत्यजिच्चैव सुषेणः श्येनजित्तथा । अतिमित्रस्तथा मित्रः पुरुजिच्चापराजितः । ऋतश्च ऋतवान् धाता वरुणो विधृतो ध्रुवः । विधारणो महातेजा वासवस्य परः सखा । ईदृगन्यादृशश्चैव एतादृगमिताशनः । क्रीडनश्च तथा शक्तिः सभरश्च महायशाः । धातुरुग्रो मुनिर्भीमो अतिमुक्तः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षिपः सहः। द्युतिर्वपुरनाधृष्यो वासः कामो जयो विराट्। एते त्वामभिषिञ्चन्तु मरुतश्च समागताः। देवा ह्येकोनपञ्चाशन्महा-बलपराक्रमाः। चित्रांगदश्चित्ररथश्चित्रसेनश्च वीर्यवान्। ऊर्णायुर-नघश्चैव उग्रसेनश्च वीर्यवान्। धृतराष्ट्रश्च सोमश्च सूर्यवर्चास्तथैव च। दुराधस्तृष्णयः कीर्णिर्नन्दिश्चित्रस्तथैव च। कलिश्चाप्यंगिरा राजन् पर्जन्यो नारदस्तथा। वृषपर्वा च हंसश्च तथा चैव हाहाहूहूः। विश्वावसुस्ताम्रकश्च तथा च सुरुचिश्च यः। एते त्वामभिषिञ्चन्तु गंधर्वाः पृथिवीपते। आहूत्यः शोभयन्त्यश्च वेगवत्यस्तथैव च। आप्नुव-त्यस्तथोर्जश्च तथा वेकुरुपच्छुभाः। बभ्रवश्चामृतरुचो भुवश्चैव रुचस्तथा। भीरवः शोचयन्त्यश्च दिव्या ह्यप्सरसां गणाः। एतास्त्वामभिषिञ्चन्तु कामिन्यस्तरुणप्रियाः। अनुत्तमा सुरूपा च सुकेशी च मनोवती। मेनका सहजन्या च पर्णाशा पुंजिका स्थला। ऋतुस्थला घृताची च विश्वाची पूर्वचित्त्यपि। प्रम्लोचाथाप्यनुम्लोचा रंभा चैवोर्वशी तथा। पञ्चचूडा सामवती चित्रलेखा तु पार्थिव। मिश्रकेशी सुगन्धिश्च विद्युत्पर्णा तिलोत्तमा। अदृष्टलक्ष्मणा क्षेप्रा असिता रुचिका तथा। सुव्रता च सुबा-हुश्च सुबोधा सुवपुस्तथा। पुण्डरीका मुदारा च सुराधा सुरसा तथा। हेमा सरस्वती चैव कामला सूनृतालया। सुमुखा हंसपादी च वासोली-रतिलालसा। एतास्त्वामभिषिञ्चन्तु राजन्नप्सरसः शुभाः। प्रह्लादश्च महातेजास्तथा राजन्विरोचनः। धन्वीबाणस्तथान्ये च दितिपुत्राः समा-गताः। अभिषिञ्चन्तु दैत्याश्च दिव्येनाप्यंभसा स्वयम्। विप्रचित्तिमुखाः सर्वे दानवास्त्वां समागताः। अभिषिञ्चन्तु राजानं राज्यं कर्तुं सुसत्वराः। हेत्यश्चैव प्रहेत्यश्च सलिलेन्द्रस्तथैव च। सुकेशी पौरुषेयश्च यज्ञहापुरु-षादकः। विद्युत्सूर्यस्तथा व्यासो वधश्च रसनस्तथा। एते त्वामभिषि-ञ्चन्तु समागम्याद्य राक्षसाः। सुसिद्धो माणिभद्रश्च सुमनो नन्दनस्तथा। कन्दूतिः पञ्चगश्चैव मणिमान्वसुमांस्तथा। सर्वानुभूतिः शंखश्च पिङ्गाक्षश्चतुरस्तथा। यमो मन्दरसो भीमः पद्मचन्द्रः प्रभाकरः। मेघवर्णश्च भव्यश्च प्रद्योतश्च महायशाः। भूतिमान्केतुमांश्चैव मौलिमांश्च चतुर्दशः। श्वेतश्च विपुलश्चैव प्रद्युम्नश्च जयावहः। पक्षयक्षो बलाकश्च कुमुदश्च बलाहकः। पद्मनाभः सुगन्धश्च सुवीरो विजयाकृतिः। पौर्ण-मासो हिरण्याक्षः शतजिह्वश्च वीर्यवान्। एते त्वामभिषिञ्चतु राजवृ-द्धाश्च सत्तमाः। शंखं पद्मश्च राजेन्द्र मकरः कच्छपस्तथा। महापद्मश्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीलश्च खर्वः कुन्दो मुकुन्दकः । एते त्वामभिषिञ्चन्तु निधयस्तु समागताः । छगलाश्चैकवक्राश्च ये च सूचीमुखा नृपाः । दुःपूरणा विषादाश्च ज्वलनांगारकास्तथा । कुंभमात्राः प्रतुंडाश्च उपवीरा उलूखलाः । अकर्णाश्चक्रखंडाश्च तथा ये पात्रपाणयः । पांसवश्च वितुंडाश्च विपुणाः स्कंदनास्तथा । एते त्वामभिषिञ्चन्तु पिशाचानां तु जातयः । ब्रह्मचर्ये स्थिता दान्ताः सर्वज्ञाः सर्वदर्शिनः । नानाप्रकारवदना नानाबाहुशिरोधराः । चतुष्पथपराट्टालशून्यालयनिकेतनाः । त्रिपुरारिं भवं देवं ये गता मनुजेश्वर । ते त्वामद्याभिषिञ्चन्तु गणा भूतपतेः स्वयम् । महाकालं पुरस्कृत्य नरसिंहं च मातरः । सर्वास्त्वामभिषिञ्चन्तु राजराज्ये नराधिप । ग्रहः स्कन्दो पिशाचश्च नैगमेयस्तथैव च । अभिषिञ्चन्तु राजंस्त्वां सर्वे स्कन्दग्रहाः शुभाः । डाकिन्यो याश्च योगिन्यः खेचर्यो भूचरास्तथा । सर्वास्त्वामभिषिञ्चन्तु समेत्य मनुजेश्वर । गरुडश्चारुणश्चैव आरुणिश्च महाखगः । संपाती विनतश्चैव विष्णुर्गन्धकुमारकः । एते त्वामभिषञ्चन्तु सुपर्णाः पृथिवीपते । अनन्तश्च महानागो वासुकिः शेषतक्षकौ । सुपर्णारिश्च कुंभश्च वामनोऽथाञ्जनोत्तमः । ऐरावतो महापद्मः कंबलाश्वतरावुभौ । एलापत्रश्च खेण्डश्च कर्कोटकधनञ्जयौ । महाकर्णो महानीलो धृतराष्ट्रबलाहकौ । कुमारः पुष्पदन्तश्च गन्धर्वश्च मनस्विकः । नहुषः खररोमा च शंखपालस्तथैव च । पद्मश्च कुलिकश्चैव पाणिरित्येवमादयः । नागास्त्वामभिषिञ्चन्तु राजराज्ये नराधिप । कुमुदैरावतौ पद्मः पुष्पदन्तोथ वामनः । सुप्रतीकोऽञ्जनो नीलः पान्तु त्वां सर्वतो द्विपाः । पैतामहास्तथा हंसा वृषभः शांकरस्तथा । उच्चैश्रवाश्चाश्वपतिस्तथा धन्वन्तरिर्नृप । कौस्तुभः शंखराजश्च पान्तु त्वां सर्वतः सदा । चक्रं त्रिशूलं वज्रश्च नन्दकोस्त्राणि चाप्यथ । सर्वेभिषेकं दत्त्वा च दिशन्तु विजयं ध्रुवम् । धर्मश्च वृद्धशाखाश्च सत्यं दानं तपस्तथा । यशो यज्ञास्तथैवायुर्ब्रह्मचर्यं दमः शमः । एते त्वामभिषिञ्चन्तु चित्रगुप्तश्च पार्थिव । दंडः पिंगलकश्चैव मृत्युः कालान्तकावुभौ । वालखिल्यास्तथा सर्वे भवन्तु विजयाय ते । दिग्धेनवश्चतस्रस्त्वां सुरभिश्च तथा नृप । अभिषिञ्चन्तु सर्वाभिर्गोभिः सार्द्धं नरेश्वर । देव्यासश्च वाल्मीकिः शमनोऽथ पराशरः । देवलः पर्वतश्चैव दुर्वासा भागुरिः शुचिः । याज्ञवल्क्यः सजाबालिर्जमदग्निः शुचिश्रवाः । विश्वामित्रः स्थूलकच्छो वर्द्धनोत्रिर्विदूरथः । एकतश्च द्वितश्चैव त्रितो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौतमगालवौ। शांडिल्यश्च भरद्वाजो मौद्गल्यो वेदवाहनः। बृहदश्वः कुदिमडो जपजानुर्घटोदरः। यवक्रीतोऽथ रैभ्यश्च आत्माधामश्च जैमिनिः। ऋषिः सारंगवश्चैव तथागस्त्यो महातपाः। दुदुर्मृदुर्मिशश्चैव इन्द्रवाहुर्महोदयः। कात्यायनश्च कण्वश्च बलाकश्चेभनन्दनः। एते त्वामभिषिञ्चन्तु मुनयः पार्थिवोत्तम। पृथुर्दिलीपो भरतो दुःष्यन्तः शत्रुजिद्बली। मनुः ककुत्स्थश्चानेना युवनाश्वो जयद्रथः। मान्धाता मुचुकुन्दश्च तथा राजा पुरूरवाः। इक्ष्वाकुश्च यदुश्चैव पूरुर्भूरिश्रवास्तथा। अंबरीषश्च नाभागो वृहदश्वो महाहनुः। प्रद्युम्नश्चाथ सुद्युम्नो भूरिद्युम्नश्च संजयः। एते चान्ये च राजानस्तव राजन् दिवं गताः। समायान्त्वभिषेकाय विजयाय तथा श्रियै। पर्जन्याद्यास्तथा भूप मेघाः सर्वे समागताः। द्रुमाश्चौषधयो रत्नं बीजानि विविधानि च। सर्वे त्वामभिषिञ्चन्तु राजराज्ये सुसत्वराः। पुरुषश्चाप्रमेयात्मा महाभूतानि यानि च। पृथिवी वायुराकाशमापो ज्योतिस्तथैव च। मनोबुद्धिस्तथैवात्मा अव्यक्तश्च महीपते। एते त्वामभिषिञ्चन्तु समेता वसुधाधिप। रुक्मभौमः शिलाभौमः पातालो नीलमृत्तिकः। पीतरक्तासिताश्चैव श्वेतभौमास्तथैव च। एते त्वामभिषिञ्चन्तु विजयाय महीपते। जंवूशाकः कुशः क्रौञ्चः शाल्मलीद्वय एव च। प्लक्षश्च पुष्करश्चैव स्वस्वाम्यं प्रदिशन्तु ते। उत्तराः कुरवः पुण्या रम्या हैरण्वतास्तथा। भद्राश्वः केतुमग्लश्च वर्षश्चैव इलाव्रतः। हरिवर्षः किंपुरुषो वर्षो भारतसंज्ञकः। एते त्वामभिषिञ्चन्तु समेत्य वसुधाधिप। इक्षुद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान्। नागद्वीपस्तथा सौम्यो गन्धर्वो वरुणस्तथा। अयं च नवमस्तेषां स्वस्वाम्यं प्रदिशन्तु ते। हिमवान् हेमकूटश्च निषधो नील एव तु। श्वेतशृंगोऽगवान्मेरुर्माल्यवद्गन्धमादनौ। महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवांस्तथा। विन्ध्यश्च पारियात्रश्च सर्व एव महीधराः। समागम्याभिषिञ्चन्तु त्वामद्य वसुधाधिप। ऋग्वेदोथ यजुर्वेदः सामवेदस्तथैव च। अथर्ववेदो वेदास्त्वामभिषिञ्चन्तु पार्थिव। इतिहासो धनुर्वेदो गान्धर्वश्चायुसंज्ञितः। सप्तोपवेदाश्च तथा विजयाय भवन्तु ते। शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः। छन्दोविचितिषष्ठानि विजयाय भवन्तु ते। अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश। सांख्ययोगः पाञ्चरात्रो वेदः पाशुपतं तथा। कृतान्तपञ्चकं चैव शास्त्राणि विविधानि च। गायत्री पापशमिनी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गङ्गादेवी महाशिवः । गान्धारी च तथा नारी विजयं प्रदिशन्तु ते । देव-
दानवगन्धर्वा यक्षराक्षसपन्नगाः । ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः । अस्त्राणि सर्वशस्त्राणि रा-
जानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये । स्था-
नानि च समस्तानि पुण्यान्यायतनानि च । जीमूतानि च सर्वाणि तद्वि-
काराश्च सर्वशः । उक्तानि चाप्यनुक्तानि विजयाय भवन्तु ते । लवणक्षीर-
तोयाश्च घृतमण्डोदकास्तथा । दधिमण्डोदकाश्चैव सुरोदश्च नराधिप ।
तथैवेक्षुरसोदश्च तथा स्वादूदकश्च यः । गर्भोदकश्च तोयैस्त्वामभिषिञ्चन्तु
पार्थिव । चत्वारः सागराश्चैव स्वेन तोयेन पार्थिव । समागम्याभिषेके तु
विजयं प्रदिशन्तु ते । पुष्करश्च प्रयागश्च प्रभासो नैमिषं तथा । तथा ब्रह्म-
सरः पुण्यं गयाशीर्षं च पार्थिव । कालोदको नन्दिकुण्डस्तथैवोत्तरमानसः ।
स्वर्गमार्गप्रदश्चैव तथा पञ्चनदश्च यः । भृगुतीर्थं प्रभासश्च तथैवामरकंटकः ।
आश्रमः कालिकायाश्च तृणबिन्दोस्तथाश्रमः । गोतीर्थं चाग्नितीर्थं च
विमलः स्वर्ग एव च । जंबूमार्गश्च विमलः पुण्यस्तंडुलिकाश्रमः । कपि-
लश्च तथा तीर्थो तीर्थो वातिकखंडिकौ । महासरस्तथागस्त्यकुमारीतीर्थ-
मेव च । अंगद्वारः कुशावर्त्तो बिल्वको नीलपर्वतः । वाराहः पर्वतश्चैव
तीर्थं कनखलं तथा । सुगन्धा च धरा कुंभास्तथा शाकंभरीति या ।
भृगुतुंगः सकुब्जाम्रः कपिलस्य तथाश्रमः । चमसोद्भेदनः पुण्यस्तथा
विनशनं शुभः । अजतुङ्गश्च मोचश्च अश्वगन्धश्च पार्थिव । कालंजरः सके-
दारो रुद्रकोणिस्तथैव च । महालयश्च राजेन्द्र बदर्याश्रम एव च । नन्दा
च सोमतीर्थं च सूर्यतीर्थं शतक्रतोः । अश्विनोर्वरुणस्याथ वायोर्वैश्रवणस्य
च । ब्रह्मणश्चैव शर्वस्य यमस्य च्यवनस्य च । विरूपाक्षस्य धर्मस्य तथा
चाप्सरसां नृप । ऋषीणां च वसूनां च साध्यानां मरुतां तथा । आदि-
त्यानां च रुद्राणां तथा चांगिरसां नृप । विश्वेदेवभृगूणां च तथान्येषां च
मानद । प्लक्षप्रस्रवणश्चैव सुपुत्रा च नराधिप । शालग्रामसरश्चैव वाराहो
मानसस्तथा । कामाश्रमस्त्रिकूटश्च चित्रकूटस्तथैव च । सपूर्वः क्रतुसारश्च
तथा विष्णुपदं सरः । कापिलं च तथा तीर्थं वासुकेस्तीर्थमेव तु । सिन्धूत्त-
मस्तपो द्वारोऽप्यथ सूर्यारकुंभकः । पुण्डरीकश्च राजेन्द्र गङ्गासागरसं-
गमः । सिन्धुसागरयोश्चैव संगमः सुमनोहरः । तथा कुंभावसुंदश्च
मानसं च तथा सरः । तथा बिन्दुसरः पुण्यं सरस्त्वच्छोदकं तथा ।
धर्मारण्यं फल्गुतीर्थमविमुक्तं तथैव च । लौहित्यश्च तथा पुण्यो बदरी-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पावनः शिवः। तीर्थं सप्तऋषीणां च वह्नितीर्थं तु पार्थिव। पुण्यवस्त्रा यथोमेषछागलेशस्तु पार्थिव। पुष्पन्यासस्तथा चैव तीर्थो हंसपदस्तथा। अश्वतीर्थश्च कर्णाश्वो मणिमंथस्तथैव च। देविका इन्द्रमार्गश्च स्वर्गविन्दुस्तथैव च। आहत्यकस्तथा तीर्थस्तीर्थश्चैरावतस्तथा। ऐरावती समुद्भेदे तीर्थं भोगयशःपरम्। करवीराह्वयं चैव नागमोवणिकस्तथा। पापमोचनिकश्चैव ऋणमोचनिकस्तथा। उद्वेजनस्तथा पुण्यः संपूज्यः सरसोवरः। देवब्रह्मसरः पुण्यं सर्पिर्दधि तु पार्थिव। एते चान्ये च बहवः पुण्यसंकीर्तनाः शुभाः। तोयैस्त्वामभिषिञ्चन्तु सर्वपातकनाशनैः। गंगा महानदी पुण्या ह्रदिनी ह्लादिनी तथा। पावनी च तथा सीता चक्षुः सिन्धुश्च नर्मदा। सुप्रभा काञ्चनाक्षी च विशाला मानसी ह्रदा। सरस्वत्योघनादी च सुवेषा विमलोदका। शिप्रा शोणश्च तर्पश्च सरयूर्गण्डकी तथा। अच्छोदा च विभागा च चन्द्रभागा इरावती। वितस्ता देविका रंभा केशा देवह्रदा शिवा। तथा चेक्षुमती पुण्या कौशिकी यमुना तथा। गोमती धूतपापा च बाहुदा तु सरस्वती। निर्विंध्या च तृतीया च लोहितश्च महानदः। देवस्मृतिर्वेदमाता वेदघुर्घुरदा तथा। पर्णशा वन्दना चैव सदानीरा कुमुद्वती। पीता चर्मण्वती धूमा विदर्भा वेणुमत्यपि। अवन्ती च तथा कुन्ती सुरसा च पलाशिनी। मन्दाकिनी दशार्णा च सिन्धुरेखा कुमुद्वती। तपती पिप्पली श्येनी करतोया पिशाचिकी। चित्रोपला चित्रवर्णा मंजुला वाकुला मती। शुक्तिमती सिनीवालि मंडूणी तृपिका कपूः। तापी पयोष्णी निर्विन्ध्या सिता च निषधावती। वेणा वैतरिणी भीमा मन्द एव तथा कुहूः। तोया चैव महागौरी दुर्गतिर्मिञ्जिला तथा। गोदावरी भीमरथी कृष्णवर्णा भयंकरा। तुङ्गभद्रा सुप्रकारा वात्या कावेरिरेव च। कृतमाला ताम्रवर्णी पुष्पभद्रोत्पलावती। नृसमा ऋषिकुल्या च इक्षुका त्रिदिवालया। लाङ्गुलिनी वंशधरी जंबूश्च सुकलावती। ऋषिका वरकेगा च मन्दगा मन्दवाहिनी। क्षमा देवी दया व्योमा पयोष्णी कालवाहिनी। कंपना च विशाला च करतोया सुवाहिनी। ताम्रारुणा वेत्रवती सुभद्रा चाश्ववत्यपि। अद्रिका च इमा चैव सुप्रकारा हिरण्मयी। आपगा लोपला भासी सन्ध्या तु वडवा नदी। महेन्द्रवाणी शाला च मालिका वलयावती। नीलोद्धतकरा चैव बाहुदा वनवासिनी। नन्दाचापरनन्दा च सुनन्दा वसुवासिनी।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एताश्चान्याश्च राजेन्द्र नद्यस्त्वां विविधोदकाः । सर्वपापप्रशमनाः सर्वलोकस्य मातरः । सतोयपूर्णैः कलशैरभिषिञ्चन्तु पार्थिव । एतैर्यथोक्तैर्नृपराजराज्ये दत्ताभिषेकः पृथिवीं समग्राम् । ससागरां भुंक्ष्व चिरं च जीव धर्मे च ते बुद्धिरतीव चास्तु । इतिश्रीभट्टशंकरात्मजभट्टनीलकण्ठकृते राजनीतिमयूखे राजाभिषेकप्रयोगः ।

एवं कृताभिषेको राज्यं कुर्यात् । तच्च सप्ताङ्गम् । तानि च स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि चेति । कामन्दकोऽपि—

स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत् ।
एतावदुच्यते राज्यं सत्वबुद्धिव्ययाश्रयम् ॥
नीतिशास्त्रस्य दृष्टार्थत्वान्न क्रमेऽभिनिवेशः कार्यः ।

तत्र स्वामी राजा । तत्र देवानामंशाः सन्तीत्याह मनुः—

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
इन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्गतो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् ।
स महेन्द्रः स ईशः स कुबेरश्च प्रभावत इति ॥

कामन्दकोऽपि—

राजास्य जगतो हेतुर्वृद्धेर्वृद्धाभिसंमतः ।
नयनानन्दजननः शशांक इव तोयधेः ॥
यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजाः ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥
धार्मिकं पालनपरं सम्यक्परपुरंजयम् ।
राजानमभिमन्यन्ते प्रजापतिमिव प्रजाः ॥
न्यायप्रवृत्तो नृपतिरात्मानमथ च प्रजाः ।
त्रिवर्गेणोपसंधत्ते निहन्ति ध्रुवमन्यथा ॥
धर्माद्वै यवनो राजा विधाय बुभुजे भुवम् ।
अधर्माच्चैव नहुषः प्रतिपेदे रसातलम् ॥
तस्माद्धर्मं पुरस्कृत्य यतेतार्थाय पार्थिवः ।
धर्मेण वर्द्धते राष्ट्रं तस्य स्वादु फलं श्रियः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजगुणास्तद्वृत्तं च नीतिसारे—

न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम्॥
नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः।
विनयो हीन्द्रियजयस्तद्युक्तः शास्त्रमृच्छति॥

तथा—

शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता।
उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता॥
प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता।
कुलं शीलं दमश्चेति गुणाः संपत्तिहेतवः॥
आत्मानं प्रथमं राजा विनयेनोपपादयेत्।
ततोऽमात्यांस्ततो भृत्यान् ततः पुत्रांस्ततः प्रजाः॥
सदानुरक्तप्रकृतिः प्रजापालनतत्परः।
विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते॥
प्रकीर्णविषयारण्ये धावन्तं विप्रमाथिनम्।
ज्ञानांकुशेन कुर्वीत वश्यमिन्द्रियदन्तिनम्॥

तथा—विषयामिषलोभेन मनः प्रेरयतीन्द्रियम्।
तन्निरुन्ध्यात्प्रयत्नेन जिते तस्मिन् जितेन्द्रियः॥
एवं करणसामर्थ्यात्संयम्यात्मानमात्मना।
नयाय नयविद्राजा कुर्वीत हितमात्मनः॥
एकस्यैव हि योऽशक्तो मनसः सन्निबर्हणे।
महीं सागरपर्यन्तां स कथं ह्यवजेष्यति॥
क्रियावसानविरसैर्विषयैरपहारिभिः।
गच्छत्याक्षिप्तहृदयः करीव नृपतिर्गृहम्॥
शब्दस्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
एकैकमलमेतेषां विनाशप्रतिपत्तये॥

पञ्चानां निदर्शनमाह—

शुचिदर्भांकुराहारो विदूरभ्रमणक्षमः।
लुब्धकाद्गीतलोभेन मृगो मृगयते वधम्॥
गिरीन्द्रशिखराकारो लीलयोन्मूलितद्रुमः।
करिणीस्पर्शसंमोहादालानं याति वारणः॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्निग्धदीपशिखालोके विलोकितविलोचनः ।
मृत्युमृच्छति संमोहात्पतंगः सहसा पतन् ॥
दूरेऽपि हि भवन्दृष्टेरगाधसलिले वसन् ।
मीनस्तु सामिषं लोहमास्वादयति मृत्यवे ॥
द्विरेफो गन्धलोभेन कमले याति बन्धनम् ।
एकैकशो विनिघ्नन्ति विषया विषसन्निभाः ॥
क्षयी तु स कथं न स्याद्युगपत्पञ्च सेवते ।
सेवेत विषयान्काले मुक्त्वा तत्परतां वशी ॥
सुखं हि फलमर्थस्य तन्निरोधे वृथा श्रियः ।
धर्मादर्थोऽर्थतः कामः कामात्सुखफलोदयः ॥
आत्मानं हन्ति तौ हत्वा युक्त्या यो न निषेवते ।
सकामासक्तमनसां कान्तामुखविलोकने ॥
गलन्ति गलिताश्रूणां यौवनेन सह श्रियः ।
नामापि स्त्रीति संह्लादि विकरोत्येव मानसम् ॥
किंपुनर्दर्शनं तस्या विलासोल्लसितभ्रुवः ।
रहःप्रचारकुशला मृदुगद्गदभाषिणी ॥
कं न नारी रमयति रक्तं रक्तान्तलोचना ।
मुनेरपि मनोवश्यं सरागं कुरुतेऽङ्गना ॥

तत्र कानिचिन्निन्दति—

मृगयाक्षास्तथा पानं गर्हितानि महीभुजाम् ।
दृष्टास्तेभ्यस्तु विपदः पाण्डुनैषधवृष्णिषु ॥
कामः क्रोधस्तथा मोहो लोभो मानो मदस्तथा ।
षड्वर्गमुत्सृजेदेनमस्मिन् त्यक्ते सुखी नृपः ॥
दंडक्यो नृपतिः कामात्क्रोधाच्च जनमेजयः ।
लोभादैलस्तु राजर्षिर्वातापी मोहतोऽसुरः ॥
पौलस्त्यो राक्षसो मानान्मदाद्दंभोद्भवो नृपः ।
प्रयाता निधनं ह्येते शत्रुषड्वर्गमाश्रिताः ॥
शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः ।
अम्बरीषो महाभागो बुभुजाते चिरं महीम् ॥
वर्धयन्निह धर्मार्थौ सेवितौ सद्भिरादरात् ।
निगृहीतेन्द्रियग्रामः कुर्वीत गुरुसेवनम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्त्राय गुरुसंयोगः शास्त्रं विनयवृत्तये ।
विद्याविनीतो नृपतिः सतां भवति संमतः ॥
प्रेर्यमाणोऽप्यसद्वृत्तैर्नाकार्येषु प्रवर्तते ।
आददानः प्रतिदिनं कलाः सम्यक् महीपतिः ॥
जितेन्द्रियस्य नृपतेर्नीतिशास्त्रानुसारिणः ।
भवन्त्युज्ज्वलिता लक्ष्म्यः कीर्तयश्च नभःस्पृशः ॥

तथा—इयं हि लोके व्यतिरेकवर्तिनी
स्वभावतः पार्थिवता समुद्धता ।
बलात्तदेनां विनये नियोजये-
न्नयस्य सिद्धौ विनयः पुरस्सरः ॥
गुरुस्तु विद्याधिगमाय सेव्यते
श्रुता च विद्या मतये महात्मनाम् ।
श्रुतानि पुण्यानि मतानि वेधसा-
मसंशयं साधु भवन्ति भूतये ॥

वेधसां पूर्वपुरुषाणाम्। विद्यानिरूपणं नीतिसारे—

आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिश्च शाश्वती ।
विद्याश्चतस्र एवैता इति नो गुरुदर्शनम् ॥
आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
अर्थानर्थौ तु वार्तायां दण्डनीतौ नयानयौ ॥

आन्वीक्षिक्यां तर्कशास्त्रवेदान्ताद्यन्तर्भावः, त्रय्यां मीमांसास्मृत्यादेः।
तथा—

वर्णाः सर्वाश्रमाश्चैव विद्यास्वासु प्रतिष्ठिताः ।
ईक्षणाद्रक्षणात्तासां तद्धर्मस्यांशभाङ् नृपः ॥
आन्वीक्षिक्यात्मविद्या स्यादीक्षणात्सुखदुःखयोः ।
ईक्षमाणस्तथा तत्त्वं हर्षशोकौ व्युदस्यति ॥
ऋग्यजुःसामनामानस्त्रयो वेदास्त्रयी मता ।
उभौ लोकाववाप्नोति त्रय्यां तिष्ठन् यथाविधि ॥
अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते ॥
पाशुपाल्यं कृषिः पण्यं वार्तावार्तानुजीव्यपि ।
संपन्नो वार्तयासाधुर्न वृत्तेर्भयमृच्छति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दमो दण्ड इति ख्यातस्तस्माद्दण्डेन्महीपतिः।
तस्य नीतिर्दंडनीतिर्नयनान्नीतिरुच्यते ॥
तयात्मानं च शेषाश्च विद्याः पायान्महीपतिः।
विद्या लोकोपकारिण्यस्तत्पाता हि महीपतिः ॥
अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा।
वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यते ॥
स्वर्गानन्त्याय धर्मोऽयं सर्वेषां सर्वलिङ्गिनाम्।
तथा—सर्वस्यास्य यथान्यायं भूपतिः संप्रवर्तकः।
तस्याभावे धर्मनाशस्तदभावे जगच्च्युतिः ॥
वर्णाश्रमाचारयुक्तो वर्णाश्रमविभागवित्।
पाता वर्णाश्रमाणां च पार्थिवः सर्वलोकभाक् ॥
तथा—आनृशंस्यं परो धर्मः सर्वप्राणभृतां यतः।
तस्माद्राजानृशंस्येन पालयेत्कृपणं जनम् ॥
न हि स्वसुखमन्विच्छन् पीडयेत्कृपणं नृपः।
कृपणः पीड्यमानो हि मन्युना हन्ति पार्थिवम् ॥
को हि नाम कुले जातः सुखलेशोपबृंहितः।
अल्पसाराणि भूतानि पीडयेदविचारयन् ॥
आधिव्याधिपरीताय अद्य श्वो वा विनाशिने।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥
तथा—स्वजनैः सज्जनं कुर्याद्धर्माय च सुखाय च।
सेव्यमानस्तु स्वजनैर्महानतिविराजते ॥
हिमांशुमाली न तथा नचोत्फुल्लोत्पलं सरः।
आनन्दयति चेतांसि यथा सज्जनवेष्टितः ॥
ग्रीष्मसूर्यांशुसंतप्तमुद्वेजनमनाश्रयम्।
मरुस्थलमिवोदग्रं त्यजेद्दुर्जनसङ्गतम् ॥
निःश्वासोद्गीर्णहुतभुक् धूमधूम्रीकृताननैः।
वरमाशीविषैः सङ्गं कुर्यान्नत्वेव दुर्जनैः ॥
क्रियतेऽभ्यर्हणीयाय स्वजनाय यथाञ्जलिः।
ततः साधुतरः कार्यो दुर्जनाय हितार्थिना ॥
नित्यं मनोऽपहारिण्या वाचा प्रह्लादयेज्जगत्।
उद्वेजयति भूतानि क्रूरवाक् धनदोऽपि सन् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हृदि विद्ध इवात्यर्थं यथा संतप्यते जनः ।
पीडितोऽपि हि मेधावी न तां वाचमुदीरयेत् ॥
प्रियमेवाभिधातव्यं नित्यं सत्सु द्विषत्सु वा ।
शिखीव केकां मधुरां वाचं ब्रूते जनप्रियः ॥
मदरक्तस्य हंसस्य कोकिलस्य शिखण्डिनः ।
हरन्ति न तथा वाचो यथा साधु विपश्चिताम् ॥
ये प्रियाणि प्रभाषन्ते प्रियमिच्छन्ति तत्कृतम् ।
श्रीमन्तो वन्द्यचरिता देवास्ते नरविग्रहाः ॥

तथा—शुचिरास्तिक्यपूतात्मा पूजयेद्देवतां सदा ।
देवतावद्गुरुज नमात्मवच्च सुहृज्जनम् ॥
प्रणिपातेन हि गुरून् सतोऽनूचान चेष्टितैः ।
कुर्वीताभिमतान् भूत्यै देवान् सुकृतकर्मणा ॥

अनूचानः श्रोत्रियस्तस्य चेष्टितानि तत्क्रिया इत्यर्थः ।

सद्भावेन हरेन्मित्रं सद्भावेन च बान्धवान् ।
स्त्रीभृत्यान् प्रेममानाभ्यां दाक्षिण्येनेतरं जनम् ॥
प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे ।
गृहागते परिष्वङ्गः शक्त्या दानं सहिष्णुता ॥
स्वसमृद्धिष्वनुत्सेकः परभद्रेष्वमत्सरः ।
बन्धुभिर्बन्धुसंय्योगः स्वजने चतुरस्रता ॥
तच्चित्तानुविधायित्वमितिवृत्तं महात्मनाम् ।
अनेन गच्छन्नियतं महात्मनामिमं च
लोकं च परं च विन्दतीति ।

अन्यानपि गुणानाह याज्ञवल्क्यः—

महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः ।
विनीतः सत्वसंपन्नः कुलीनः सत्यवाक् शुचिः ॥
अदीर्घसूत्रः स्मृतिमान् अक्षुद्रोऽपरुषस्तथा ।
धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥
स्वरंध्रगोप्तान्वीक्षिक्यां दंडनीत्यां तथैव च ।
विनीतस्त्वर्थवार्तायां त्रय्यां चैव नराधिपः ॥

स्थूललक्षः, स्थूलं महत् लक्ष्यमुद्देश्यमस्यासौ । कुलीनः, कन्यादान-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्रहणयोः सत्कुलसंबन्धेन कुलमर्यादारक्षणपरः। अदीर्घसूत्रः, कार्येषु त्वरावान्। स्मृतिमानविस्मरणशीलः। अक्षुद्रोऽदोषद्वेषी। अपरुषः, परदोषापकीर्तनः। अव्यसनः, व्यसनहीनः।

व्यसनानि चाष्टादशाह मनुः—

मृगयाक्षा दिवास्वापः परिवादः स्त्रियो मदः।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥

तत्र सप्त कष्टतमान्याह मनुः—

पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्।
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे॥
दंडस्य पातनं चैव वाक्पारुष्यार्थदूषणे।
क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा॥
सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः।
पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मनः॥

परिवादः, परनिन्दा। वृथाट्या, वृथाटनम्। पैशुन्यमज्ञातपरदोषज्ञापनम्। साहसं, साधोर्बन्धनादिनिग्रहः। द्रोहश्छद्मवधः। ईर्ष्या, परगुणासहिष्णुता। परगुणेषु दोषाविष्करणमसूया। अर्थदूषणमर्थापहारो देयानामदानं च। वाक्पारुष्यम्, आक्रोशादि।

मद्ये दोषाधिक्यमाह वराहमिहिरः—

पत्नीयत्यपि मातरं मदवशात्पत्नीं च मात्रीयति
श्वभ्रीयत्यपि मन्दिरं दृढशिलं कूपं च गेहीयति।
स्वल्पं वार्युदधीयतीश्वरमयां मोहात्स्थलीयत्यपि
मित्रीयत्यपि विद्विषं किमपरं कुर्यान्न यन्मद्यपः॥

नीतिसारे—

वमनं निर्गुणत्वं च संज्ञानाशो विवस्त्रता।
असंबद्धप्रलापित्वमकस्माद्व्यसनं मुहुः॥
सद्भिर्वियोगोऽसद्भिश्च संयोगोऽनर्थसंगमः।
स्खलनं वेपथुस्तन्द्रा चिन्तान्तस्त्रीनिषेवणम्॥

संकल्पेनैव स्त्रीसङ्गः। इत्यादिपानव्यसनमत्यन्तं सद्भिर्गर्हितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथाश्रुतबलोपेताः पानदोषेण भूयसा ।
क्षयमक्षीणनामानो जग्मुरन्धकवृष्णयः ॥

एवं पाने वर्जितेऽपवादो योगयात्रायाम्—

अभ्यासनोत्सवभिषग्वचनोपदेशैः
कामं पिबेदमतिलोपकृदप्रकाशम् ।
तदेकनाश्यरोगादौ तद्वचनैरित्यर्थः ॥

द्यूते दोषानाह कामन्दकः—

लोभो धर्मक्रियालोपः कर्मणामप्रवर्तनम् ।
सत्समागमविच्छित्तिरसद्भिः सह वर्तनम् ॥
स्वल्पेऽप्यर्थे निराशित्वमसत्यपि च साशता ।
प्रतिक्षणं क्रोधहर्षौ विषादश्च प्रतिक्षणम् ॥
प्रतिक्षणं च संक्लेषः साक्षिप्रश्नः प्रतिक्षणम् ।
अन्यावाचोऽङ्गदौर्बल्यं शास्त्रार्थाप्रत्यवेक्षणम् ॥
गूहनं मूत्रशकृतोः क्षुत्पिपासोपपीडनम् ।
इत्यादीन् शास्त्रनिपुणा द्यूते दोषान् प्रचक्षते ॥
पाण्डवो धर्मराजस्तु लोकपाल इवापरः ।
द्यूतेन द्विषता विद्वान्कलत्राण्यपहारितः ॥
नलश्च राजा द्यूतेन हृते राज्यमहोदये ।
धर्मदारान्वने त्यक्त्वा परकर्माकरोत्प्रभुः ॥
द्यूतादनर्थसंरंभी द्यूतात्स्नेहक्षयो महान् ।
पक्षाणां संहतानां च द्यूताद्भेदः प्रवर्तते ॥ इति ।

मृगयादोषा उक्ता नीतिसारे—

यानक्षोभो यानपातो यानाभिहरणं तथा ।
क्षुत्पिपासाश्रमायासशीतवातोष्णपीडनम् ॥
अभियानस्य संपत्त्या यानव्यसनजं महत् ।
दुःखं प्रतप्तसिकताकुशकंटकभूमयः ॥
ऋक्षाजगरमातङ्गसिंहव्याघ्रभयानि च ।
इत्यादिपृथिवीन्द्राणां मृगयाव्यसनं महदिति ॥

अन्येष्वपि व्यसनेषु लोकतो यथायथं दोषा ऊह्याः । विस्तरभयात्तु न ते सर्वे प्रपञ्चिताः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुणेषु केषांचिद्व्यवस्थामाह मनुः—

स्वराष्ट्रे न्यायवृत्तः स्याद्भृशं चंडश्च शत्रुषु ।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥

याज्ञवल्क्यः—

स्याद्राजा भृत्यवर्गे च प्रजासु च यथा पिता ।

अन्येऽपि गुणा उक्ता योगयात्रायाम्—

मेधावी मतिमानदीनवचनो दक्षः क्षमावानृजु-
र्धर्मात्माप्यनसूयको लघुकरः षाड्गुण्यविच्छक्तिमान् ।
उत्साही पररंध्रवित्कृतधृतिर्वृद्धिक्षयस्थानवि-
च्छूरो न व्यसनी स्मरत्युपकृतं वृद्धोपसेवी च यः ॥

तथा—

परीक्ष्यकारी न विकत्थनश्च दृढप्रतिज्ञोऽतिदृढप्रहारी ।
जितेन्द्रियः स्याज्जितकोपलोभनिद्रालसः स्थानपरिग्रहश्च ॥
त्यागी विनीतः प्रियदर्शनश्च व्यपेतमोहः प्रतिपत्तियुक्तः ।
देशस्य कालस्य च भागवेत्ता स्वयं च यः स्याद्व्यवहारदर्शी ॥

शब्दार्थविज्ञानपटुः प्रगल्भः
संग्रामविद्याकुशलोऽभिजातः ।
मिताभिभाषी मितसत्यवक्ता
दैवान्वितो यश्च स धाम लक्ष्म्याः ॥

त्यागीत्युक्तं तत्र पात्रे दातव्यमपात्रे दातुरनिष्टमुक्तं मिहिरेण—

गुणैः समस्तैरपि संप्रयुक्ता कन्येव पित्रा विगुणाय दत्ता ।
करोत्यकीर्तिं सुखवित्तहानिं शास्त्रेतरज्ञानजडाय दातुः ॥

अपात्रेऽपि क्वचिद्दानमुक्तं भारते—

यो ज्ञातिमनुगृह्णाति दरिद्रं दीनमातुरम् ।
स पुत्रभृत्यवृद्धिं च श्रेयश्चानन्त्यमश्नुते ॥
ज्ञातयो वर्द्धनीयास्तैर्य इच्छन्त्यात्मनः शुभम् ।
विगुणाश्चापि संरक्ष्या ज्ञातयो भरतर्षभ ॥
किंपुनर्गुणवन्तस्ते त्वत्प्रसादाभिकांक्षिणः ।
ज्ञातिभिर्विग्रहस्तात न कर्तव्यो भवार्थिना इति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजकृत्यम्

तस्य कृत्यमुक्तं मिहिरेण—

विचिन्त्य कार्याणि निशावसाने
द्विषत्सुहृन्मण्डलसंश्रितानाम् ।
बलार्थदेशेषु नियोजितानां
समाश्रितानां च कृताकृतानि ॥

तथा—

सवेणुवीणापटहस्वनेन
गीतेन पूर्वं व्यपनीतनिद्रः ।
शय्यां त्यजेत्तूर्यरवावसाने शृण्वन्
गिरो मङ्गलपाठकानाम् ॥

तदुत्तरमाचारमयूखोक्तप्रकारेण शौचदन्तधावने कुर्यात् । तत्र दन्तधावनत्यागे परीक्षोक्ता योगयात्रायाम्—

अभिमुखपतितं प्रशान्तदिक्स्थं
शुभमतिशोभनमूर्ध्वसंस्थितं च ।
अशुभकरमतोऽन्यथा प्रदिष्टं
स्थितपतितं च करोति मिष्टमन्नम् ॥

श्मश्रुकर्मणि विशेषः—

राज्ञः कार्यं पञ्चमे पञ्चमेऽन्हि
क्षौरर्क्षे वा श्मश्रु तस्योदये वा ।
त्यक्त्वा ताराः सप्त पञ्च त्रिपूर्वा
यात्राकाले नैव कार्यं न युद्धे ॥

ततश्च पञ्चाङ्गादिश्रवणमुक्तम्—

श्रुत्वा तिथिं भग्रहवासरं च
प्राप्नोति धर्मार्थयशांसि सौख्यम् ।
आरोग्यमायुर्विजयं शुभं च
दुःस्वप्ननाशं च तथा विदध्यात् ॥

आयुर्जनकं विजयार्थं दुःस्वप्ननाशकं च कर्म कुर्यादित्यर्थः—
दुःस्वप्नाश्चाचारमयूख उक्ताः । तच्छान्तयः शान्तिमयूखे वक्ष्यन्ते ॥
ततः कृत्यम्—

प्रणम्य देवांश्च गुरूंश्च पूर्वं दत्त्वा च गां वत्सयुतां द्विजाय ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दृष्ट्वा मुखं सर्पिषि दर्पणे च सर्पिश्च दद्यात्सहिरण्यमेवम् ॥

ततश्च पर्वादौ भूदानं निबन्धादिदानं च कुर्यादित्याह याज्ञवल्क्यः—

दत्त्वा भूमिनिबन्धं वा कृत्वा लेख्यं च कारयेत् ।
आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः ॥

निबन्धो, वृत्तिः । भद्रो, धार्मिकः । लेख्यप्रकारमपि स एवाह—

पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम् ।
अभिलेख्यात्मनो वंश्यानात्मानं च महीपतिः ॥
प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनम् ।
स्वहस्तकालसंपन्नं शासनं कारयेत्स्थिरम् ॥

प्रतिगृह्यत इति प्रतिग्रहो भूनिबंधादि तस्य परिमाणम् । दानं दीयमानक्षेत्रादि तस्य छेदो मर्यादा । स्वहस्तेन स्वहस्तलिखितेन, कालेन च शकवर्षमासपक्षदिनरूपेण कारयेत्सन्धिविग्रहादिकारिणा—

सन्धिविग्रहकारी तु भवेद्यस्तस्य लेखकः ।
स्वयं राज्ञा समादिष्टः स लिखेद्राजशासनम् ' इतिस्मरणात ॥

तथा—

प्रेषयेच्च तथाचारान्स्वेष्वन्येषु च सादरम् ।
ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनन्दितः ॥
दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गां काञ्चनं महीम् ।
नैवेशिकानि च तथा श्रोत्रियाणां गृहाणि च ॥

नैवेशिकानि विवाहोपयोगीनि ।

ततश्च सभां प्रविशेदित्युक्तं मिहिरेण—

स्मितप्रसन्नप्रथमाभिभाषितैः
प्रसाददृष्टया करसंग्रहैश्च ।
यथानुकूलं हृदयान्यपि द्विषां
प्रसादयन् धर्मसभां समाश्रयेत् ॥

सभाप्रवेशनानन्तरमाह मनुः—

तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत् ।
विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः ॥

तत्र दण्डयान् दण्डयेदित्याह वराहमिहिरः—

क्षमान्वितोऽस्मीति विचिन्त्य चैवं
दण्डयेषु दण्डक्षमणं न धर्मः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दण्डप्रभावो हि स दुर्जनस्य
हस्तेन यो जीवति जीववर्गः ॥
सुतरामभिवर्द्धतेऽभिमानो
नीचानां क्षमयान्विते नृपे च ।
अत उग्रतरेण ते निवर्त्या
येनान्येऽपि खलास्तथा न भूयः ॥
यस्मिन् गृहीते सदृशापराधो
महाजनस्त्रासमुपैति तस्मिन् ।
दण्डो निपात्यो मनुजेश्वरेण
कालान्तरेऽन्यव्यपदिश्य कार्यम् ॥

दण्डाकरणे चानिष्टम् । यथोक्तम्—
द्विरद इव मदेन विप्रयुक्तो
विषरहितो भुजगो व्यसिश्च कोशः ।
परिभवमुपयाति नापराधे
यदि मनुजाधिपतिः करोति दण्डम् ॥

दण्डश्च योग्य एव कार्य इत्युक्तं योगयात्रायाम्—
एकेऽस्य तुल्योदरपाणिपादा-
दण्डाय भीताः प्रणमन्ति मर्त्याः ।
अत्युग्रदण्डादपि चोद्विजन्ते
दण्डोऽपराधप्रतिमः शिवाय ॥

केषांचिच्च पञ्चयज्ञवदावश्यकत्वमुक्तं मिहिरेण—
दुष्टस्य दण्डः सुजनस्य पूजा
न्यायेन कोशस्य च संप्रवृद्धिः ।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा
पञ्चैव यज्ञाः कथिता नृपाणाम् ॥

मनुः—
कन्यानां संप्रदानं च कुमाराणां च रक्षणम् ।
दूतसंप्रेषणं चैव कार्यशेषं तथैव च ॥
अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम् ।
कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्वतः ॥
अनुरागापरागौ च प्रचारं मण्डलस्य च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टविधं कर्म प्रचेता आह—

आदाने च विसर्गे च तथा प्रैषनिषेधयोः ।
पञ्चमे चानुवचने व्यवहारस्य चेक्षणे ॥
दण्डशुद्ध्योः समायुक्तस्तेनाष्टगतिको नृपः ।

शुद्धिः प्रायश्चित्तम् । पञ्चवर्गः—

सहायाः साधनोपाया विभागो देशकालयोः ।
विनिपातप्रतीकारः सिद्धिः पञ्चांगमिष्यते ॥

मनुः—

उपेतारमुपायं च सर्वोपायाश्च कृत्स्नशः ।
एतत्त्रयं समाश्रित्य प्रयतेतात्मसिद्धये ॥

ततश्च भोजनमुक्तं योगयात्रायाम्—

श्रान्तश्च तस्मिन्विनियुज्य साधून्
संग्रामविद्यादिविभक्तकालः ।
सर्वाणि कार्याणि यथाक्रमेण
कृत्वा गृहं भोक्तुमथो विशेत्सः ॥

मनुरपि—

एवं सर्वमिदं राजा सह संमंत्र्य मन्त्रिभिः ।
व्यासज्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं व्रजेत् ॥
विषघ्नैरगदैश्चास्य सर्वद्रव्याणि योजयेत् ।
विषघ्नानि च रत्नानि नियतो धारयेत्सदा ॥

भोजनमाह स एव—

तत्रात्मभूतैः कालज्ञै रक्षार्थं परिचारकैः ।
सुपरीक्षितमन्नाद्यं अद्यान्मन्त्रैर्विषापहैः ॥

कामन्दकोऽपि—

याने शय्यासने पाने भोज्ये वस्त्रे विभूषणे ।
सर्वत्रैवाप्रमत्तः स्याद्बुद्ध्येत विषदूषितम् ॥
विषघ्नैरुदकैः स्नातो विषघ्नमणिभूषितः ।
परीक्षितं समश्नीयाज्जाङ्गलीविद्भिषग्वृतः ॥

जाङ्गली आरण्यवृश्चिकादिविषं तद्वित् तत्परिहारविदित्यर्थः । तत्र भोजनसमये विषदिग्धान्नपरीक्षार्थं पक्षिणः स्थाप्याः । तेषां च चेष्टया विषं ज्ञेयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथोक्तं नीतिसारे—

भृङ्गराजः शुकश्चैव सारिका चेति पक्षिणः ।
क्रोशन्ति भृशमुद्विग्ना विषपन्नगदर्शनात् ॥
चकोरस्य विरज्येते नयने विषदर्शनात् ।

विरज्येते निमीलिते भवतः ।

व्यक्तं च माद्यति क्रौञ्चो म्रियते मत्तकोकिलः ।
जीवंजीवस्य च ग्लानिर्जायते विषदर्शनात् ॥

ग्लानी रोगावृतता ।

एषामन्यतमेनापि समश्नीयात्परीक्षिते ।

परीक्षामाह कामन्दकः—

भोज्यमन्नं परीक्षार्थं प्रदद्यात्पूर्वमग्नये ।
वयोभ्यश्च ततो दद्यात्तत्र लिङ्गानि लक्षयेत् ॥

अग्निमध्ये क्षिपेदित्यर्थः ।

धूमर्चिर्नीलता वह्नेः शब्दस्फोटश्च जायते ।
अन्नेन विषदग्धेन वयसां मरणं भवेत् ॥

द्रव्यविशेषेण परीक्षामाह स एव—

रसस्य नीला पयसश्च ताम्रा
मद्यस्य तोयस्य च कोकिलाभा ।
श्यामा च दध्नो विषदूषितस्य
वह्नौ भवत्यूर्ध्वगता च लेखा ॥

विषदिग्धवस्त्रपरीक्षोक्ता नीतिसारे—

प्रावाराभरणानां च श्याममण्डलकीर्णता ।
तत्तूलीपक्ष्मणां लोम्नां स्याद्भ्रंशश्च विषाश्रयात् ।

ऊर्णावस्त्राणां लोम्नां भ्रंशः स्यादित्यर्थः । विषदायिनां च पुरुषाणां लक्षणमुक्तं नारदेन—

मुखस्य श्यामवर्णत्वं त्वग्भेदो जृंभणं मुहुः ।
स्खलनं वेपथुः स्वेद आवेशो दिग्विलोकनम् ॥
स्वकर्मणि स्वभूमौ स्यादनवस्थानमेव च ।
लिंगान्येतानि निपुणं लक्षयेद्विषदायिनामिति ॥

गृहे सर्पाद्युपद्रवनिरासार्थमुपायमाह कामन्दकः—

मयूरपृषतोत्सङ्गे न भवन्ति भुजङ्गमाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्मान्मयूरपृषतान् भवने नित्यमुत्सृजेत् ॥
शयनस्य गृहे तद्वन्नकुलं स्थापयेन्नृपः ' इति ।

इति विषपरीक्षा ।

पूर्वं परीक्षितमन्नमनेकविधं भक्ष्यभोज्यादिकमाचारमयूखोक्तरीत्या भुञ्जीत । तत्र च मक्षिकानिवारणार्थं व्यजनार्थं च स्त्रीभिः स्पर्शमनुजानाति मनुः—

परीक्षिताः स्त्रियश्चैव व्यजनोदकधूपनैः ।
वेषाभरणसंयुक्ताः संस्पृशेयुः समाहिताः ॥
एवं प्रयत्नं कुर्वीत पानशय्यासनाशने ।
स्नाने प्रसाधने चैव सर्वालंकारकेषु च ॥

इति भोजनम् ।

मनुः—

भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य च यथाकामं पुनः कार्याणि चिन्तयेत् ॥
अलंकृतश्च संपश्येदायुधीयं पृथग्जनम् ।
वाहनानि च सर्वाणि वस्त्राण्याभरणानि च ॥

ततः पुनः प्रसाधनादि कार्यम् ।

प्रसाधनादि...यत्किंचित्परिचारकाः ।
उपनिन्युर्नरेन्द्राय सुपरीक्षितमुद्रितम् ॥
परस्परागतं यच्च तच्च सर्वं परीक्षयेत् ।
सदा स्वेभ्यः परेभ्यश्च रक्षेद्राजा सुरक्षितः ॥

अनन्तरं च मृगयाद्यर्थं यानाद्यारोहेदिति कामन्दकः—

यानं वाहनमारोहेज्ज्ञातं यात्रोपपादितम् ।
अविज्ञातेन न तथा संकटेन न संव्रजेत् ॥

ज्ञातमन्यैः परीक्षितम् । यात्रोपपादितं तत्तद्यात्रायां योग्यम् । यथा व्याघ्रादिमृगयायां हस्त्यादि । तदा च खड्गाद्यपि बिभृयात् ।

तत्र खड्गलक्षणं योगयात्रायाम्—

अङ्गुलशतार्द्धमुत्तम ऊनः स्यात्पञ्चविंशतिः खड्गः ।
अङ्गुलमानाज्ज्ञेयः समाङ्गुलस्थोऽव्रणः शुभदः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केचन व्रणाः शुभदा इत्युक्तम्—

श्रीवृक्षवर्द्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम्।
एते व्रणाः प्रशस्ता अध्वायुधस्वस्तिकानां च॥

व्रणानामशुभत्वं तत्रैव—

कृकलासकाककंसक्रव्याद्वकबन्धवृश्चिकाकृतयः।
खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च इति॥

तदाकारस्तत्रैव—

गोजिह्वासंस्थानो नीलोत्पलवंशसदृशश्च।
करवीरपत्रसदृशश्चण्डकरो मण्डलाग्रः प्रशस्तश्च॥

मण्डलाग्रः खड्गः। तथा—

नाकारणं विवृणुयान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम्।
देशं न चास्य कथयेत्प्रतिमानयेच्च
नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम्॥

प्रतिमानयेत्पूजयेत्। अप्रयतोऽशुचिः। खड्गादिसंस्कारमाह वराहमिहिरः—

आर्कं पयो हुडविषाणमषीसमेतं
पारावताखुशकृता च युतप्रलेपः(?)।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चात्स्थितस्य न शिलासु भवेद्विघातः॥
क्षारे कदल्या मथितेन युक्ते
दिनोषिते पायितमायुधं यत्।
सम्यक्स्थितं चाश्मनि नैति भङ्गं
न चान्यलोहेष्वपि तस्य कौण्ठ्यम्॥

इति खड्गलक्षणम्।

अथ मृगया।

अश्वादिलक्षणानि बलनिरूपणे वक्ष्यामः।

सा त्रिविधा। जलस्थलान्तरिक्षभेदात्। सा च यद्यपि पूर्वं व्यसनमध्ये परिगणिता तथापि ‘अन्यकार्याविरोधेन कुर्यादाखेटकं नृपः’ इत्यादिवचनादत्यनासक्तेन कार्या। अस्यां च गुणोऽप्युक्तः कालिदासेन—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिद्ध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥

कामन्दकोऽपि—
आमादयो हि जीर्यन्ते सा योग्यैव दिवानिशम् ।
चरेषु यत्र लक्ष्येषु बाणसिद्धिश्च जायते इति ॥

तत्र जलमृगयामाह कामन्दकः—
परितापिषु वासरेषु पश्यन्
तटलेखास्थितमाप्तसैन्यचक्रम् ।
सुविशोधितनक्रमीनजालं
व्यवगाहेत जले सुहृत्समेतः ॥

तथा—अधार्मिकांश्च क्रूरांश्च दृष्टदोषान्निराकृतान् ।
परेभ्योऽभ्यागतांश्चैव दूरेणैव समाचरेत् ॥

तथा—महावातसमुद्भूतामपरीक्षितनाविकाम् ।
अन्यनौप्रतिबद्धां वा लोपयेन्नावमातुराम् ॥

लोपयेन्नाङ्गीकुर्यादित्यर्थः ।

तत्र च—
जालैश्च बडिशैश्चैव शक्तिभिः कंटकैस्तथा ।
मत्स्यकच्छपराजीवान् हन्याद्विगतसंभ्रमः ॥

इति जलमृगया ।

स्थलमृगयामाह चाणक्यः—
सुपरीक्षितरक्षितां तु सीम्नो
लघुयानस्तु मृगाटवीमुपेयात् । इति ।

कामन्दकोऽपि—
अथ चेन्मृगयाक्रीडां वांछेत्तन्नगरान्तिके ।
कारयेन्मृगयारण्यं क्रीडाहेतोर्मनोरमम् ॥
अकण्टकलतागुल्मं विषपादपवर्जितम् ।
शोधितग्राहसलिलं सुगंभीरजलाशयम् ॥
नानापुष्पसमाकीर्णं हस्तिनीकलभान्वितम् ।
अगम्यं रिपुसैन्यानां मनःप्रीतिविवर्द्धनम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तद्वनेचरचित्तज्ञैः क्लेशायाससहैर्दृढैः ।
मृगयां रक्षिभिः स्वाप्तैः प्रक्रीडेद्धीरमानसः ॥

वनेचरा मृगादयस्तेषां क्रोधभयाविष्टं चित्तं जानन्ति ।

तत्कर्मा तु नरेन्द्रस्य जनो जितपरिश्रमः ।
क्रीडनायास्य विविधा मृगजातीः प्रवेशयेत् ॥
यदा च प्रविशेद्राजा क्रीडनार्थं तथा वहिः ।
सन्नद्धं यत्नतस्तिष्ठेत्सैन्यं दूरान्तगोचरम् ॥
विधिरेवं समादिष्टो मृगयाक्रीडने वरः ।
न गच्छेदन्यथा राजा मृगयां मृगयुर्यथा ॥

लुब्धकवदेकाकी न गच्छेदित्यर्थः । एवमनासक्तः श्येनादिक्रूरपक्षिभिरन्तरिक्षमृगयामपि कुर्यात् ।

इति मृगयानिरूपणम् ।

सायंकृत्यम् ।

ततो गृहमागत्य सायंकृत्यं कार्यमित्याह मनुः—

सन्ध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत् ।
रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम् ॥
गत्वा कक्ष्यान्तरं सम्यक् समनुज्ञाप्य तं जनम् ।
प्रविशेद्भोजनार्थं तु स्त्रीभिरन्तःपुरं पुनः ॥
तत्र भुक्त्वा पुनः किंचित्तूर्यघोषैः प्रहर्षितः ।

संविशेच्च यथाकालम्, इति ।

विविक्ते च मन्त्रं कुर्यादित्याह मनुः—

सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता ।
मन्त्रयीत परं मन्त्रं राजा षाड्गुण्यसंयुतम् ॥
अन्यानपि प्रकुर्वीत शुचीन् प्राज्ञानवस्थितान् ।
सम्यगर्थसमाहर्तॄन् सामान्यान्सुपरीक्षितान् ॥
निवर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः ।
तावतोऽन्तर्हितान् दक्षान् प्रकुर्वीत विचक्षणान् ॥
तेषां मध्ये नियुञ्जीत शूरान् दक्षान् कुलोद्गतान् ।
शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आकराः सुवर्णाद्युत्पत्तिस्थानानि । कर्मान्ते धान्यादिसंग्रहस्थाने । अन्तर्निवेशने शयनादिगृहे भीरून्, शूरा हि तत्रैकान्ते कदाचिद्राजानं निहन्युः ।

अध्यक्षान् विविधान् कुर्यात्तत्र तत्र विपश्चितः ।

तत्र तत्र हस्त्यश्वादौ ।

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् ।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥

पूर्वश्लोकोक्तयोः शुचिदक्षत्वयोरत्र पुनरुक्तिः प्रशंसार्था । तत्रैव विविक्ते शस्त्रधरश्चारादीनामशस्त्रधराणां वाक्यानि शृणुयात् ।

तदुक्तम्—

तत्र शस्त्राणि धार्याणि चाराणां भेदशंकया इति ।

तत्र सर्वदा राजसमीपवर्तिनां सेवकानां लक्षणमाह कामन्दकः—

भर्तुरर्द्धासने दृष्टिं मुहूर्तान्यत्र निक्षिपेत् ।
कोऽत्रेत्यहमिति ब्रूयात् सम्यगाज्ञापयेति च ॥
आज्ञां चावितथां कुर्याद्यथाशक्त्यविलंबितम् ।
उच्चैः प्रहसनं कासं ष्ठीवनं कुत्सनं तथा ॥
जृंभणं गात्रभङ्गं च पर्वास्फोटं च वर्जयेत् ।
प्रविश्य सानुरागस्य चित्तज्ञस्य च संमतः ॥
समर्थयंश्च सत्पक्षं साधु भाषेत भाषिते ।
तन्नियोगेन वा ब्रूयादर्थं सुपरिनिश्चितम् ॥
सुखप्रबन्धगोष्ठीषु विवादे वादिनां मतः ।
विजानन्नपि न ब्रूयाद्भर्तुः क्षिप्तोत्तरं वचः ॥
प्रवीणोऽपि च मेधावी वर्जयेदभिमानिताम् ।
यदप्युच्चैर्विजानीयान्नीचैस्तदपि कीर्तयेत् ॥
कर्मणां तस्य वैशिष्ट्यं कथयेद्विनयान्वितः ।
आपद्युन्मार्गगमने कार्यकालात्ययेषु च ॥
अपृष्टोऽपि हि नान्वेषी ब्रूयात्कल्याणभाषितम् ।
प्रियं तथ्यं च च पथ्यं च वदेद्धर्मार्थमेव च ॥
परार्थं देशकालज्ञो देशे काले च साधयेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संतोषाद्यवसरे परोपकारमपि कुर्यादित्यर्थः ।

तथा—अपि स्थाणुवदासीत शुष्यन्परिगतः क्षुधा ।
नत्वेवानर्थसंपन्नाद्वृत्तिमीहेत पण्डितः ॥

तथा—गुह्यं कर्म च मन्त्रं च न भर्तुः संप्रकाशयेत् ।
विद्वेषं च विनाशं च मनसापि न चिन्तयेत् ॥
स्त्रीभिस्तद्दर्शिभिः पापैर्वैरिभूतैर्निराकृतैः ।
एकार्थचर्यां साहित्यं संसर्गं च विवर्जयेत् ॥
वेषभावानुकरणं न कुर्यात्पृथिवीपतेः ।
संपन्नोऽपि च मेधावी स्पर्द्धेत न च तद्गुणैः ॥
रागापरागौ जानीयाद्भर्तुः कुशलकर्मवित् ।
इङ्गिताकारचेष्टाभ्यस्तदभिप्रायवित्तथा ॥
तदर्थां तत्कृतां वोच्चैराकर्णयति तत्कथाम् ।
श्लाघते श्लाघनीयेषु श्लाघमानं च नन्दति ॥

राज्ञा कस्य चित्स्तुतौ क्रियमाणायां स्वयमप्यभिनन्दनं कार्यमित्यर्थः ।

कथान्तराणि स्मरति प्रकृष्टान्कीर्तयेद्गुणान् ।
निर्गुणं ह्यपि भर्तारमापत्सु न परित्यजेत् ॥

भारते—

अग्निं दीप्तमिवासीदेद्राजानमुपशिक्षितः ।
आशीविषमिव क्रुद्धं प्रभुं प्राणधनेश्वरम् ॥
यत्नेनोपचरेन्नित्यं नाहमस्मीति चिन्तयेदिति ।

राजा स्निह्यतीति मत्वा नावगणनीयः । किंतु यथा सर्पे सावधानता तथा प्रभौ कार्येत्यर्थः ।

ततः परतरो नास्ति य आपत्सूपतिष्ठते ।
स्वस्थवृत्तेषु सत्वाद्या नैव यान्त्यभिलक्ष्यताम् ॥
विपत्सु धर्मधुर्याणां तेषां नामातिरिच्यते ।
श्लाघ्या चानन्दनी चैव महतामुपकारिता ॥
काले कल्याणमाधत्ते स्वल्पापि सुमहोदयम् ।
जयाज्ञापय जीवेति नाथ देवेति चादरात् ॥
रक्षांस्यपि हि गृह्यन्ते नित्यं छन्दानुवृत्तिभिः ।
धीसत्वोद्योगयुक्तानां किं दुरापं महात्मनाम् ॥
छन्दानुवर्तिनां लोके कः परः प्रियवादिनाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अलसस्याल्पदोषस्य निर्विद्यस्याकृतात्मनः ॥
प्रदानकाले भवति मातापि हि पराङ्मुखी ।
ये शूरा ये च विद्वांसो ये च सेवाविपश्चितः ॥
तेषामेव विकाशिन्यो भोग्या नृपतिसंपदः ।
आजीव्यः सर्वभूतानां राजा पर्जन्यवद्भुवि ॥
अनाजीव्यं त्यजन्त्येनं शुष्कं वृक्षमिवाण्डजाः ।

चाणक्योऽपि—

सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति त्रयो जनाः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

तथा—

कुलं वृत्तं तथा शौर्यं सर्वमेतन्न गण्यते ।
दुर्वृत्तेऽप्यकुलीनेऽपि जनो दातरि रज्यते ॥

इत्यादिसेवकलक्षणम् ।

अथ स्वामिकृत्यं नीतिसारे

अपेक्ष्य हि नृपः कालं भृत्यानामनुजीविनाम् ।
कर्मणामानुरूप्येण वृत्तिं समनुकल्पयेत् ॥
स्थाने काले च पात्रे च नहि वृत्तिं विलोपयेत् ।
एतद्वृत्तिविलोपेन राजा भवति गर्हितः ॥
अपात्रवर्षणं जातु न कुर्यात्स विगर्हितम् ।
अपात्रवर्षणादन्यत्किं स्यात्कोशक्षयादृते ॥
कुलं विद्यां श्रुतं शौर्यं सौशील्यं भूतपूर्वताम् ।
वयोवस्थां च संप्रेक्ष्य आद्रियेत महात्मनः ॥
कुलीनान्नावमन्येत सम्यग्वृत्तान्मनस्विनः ।
त्यजन्त्येते च भर्तारं घ्नन्ति चामानहेतुना ॥
निरालोके हि लोकेऽस्मिन्नासते तत्र पण्डिताः ।
जात्यस्य हि मणेर्यत्र काचेन समता मता ॥
कृशोऽपि हि विवेकज्ञो याति संश्रयणीयताम् ।

यथा—

सर्वैर्गुणैर्विहीनोऽपि स राजा यः प्रतापवान् ।
प्रतापयुक्तास्त्रस्यन्ते परे सिंहान्मृगा इवेति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विरक्तस्वामिलक्षणमुक्तं कामन्दकेन—

अकोपोऽपि सकोपाभः प्रसन्नश्चापि निष्फलः ।
वदत्यकस्माद्दुष्टेति रूक्षं च मुहुरीक्षते ॥
विज्ञाप्यमानो वृत्त्यर्थं सहसोत्थाय गच्छति ।
संभावयति दोषेण वृत्तिच्छेदं करोति च ॥
साधूक्तमपि तद्वाक्यं समर्थयति चान्यथा ।
आचक्षाणकथाभङ्गं करोति विरसीभवन् ॥
उपास्यमानः शयने सुप्तवत्तत्र तिष्ठति ।
यत्नेन बोध्यमानोऽपि सुप्तवच्च विचेष्टते ॥
इत्यादि ह्यनुरक्तस्य विरक्तस्य च लक्षणम् ।
रक्ताद्वृत्तिं समीहेत विरक्तं च परित्यजेदिति ॥

अत्र षाड्गुण्यसंयुतमिति मन्त्रविशेषणमुक्तं तानाह मनुः—

सन्धिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षाड्गुण्यं चिन्तयेत्सदा ॥

तत्र कामन्दकः सन्धिं निरूपयति—

बलीयसाभियुक्तस्तु नृपोऽनन्यप्रतिक्रियः ।
आपन्नः सन्धिमन्विच्छेत्कुर्वाणः कालयापनामिति ॥

तत्र नीतिसारे संधिर्यद्यप्यनेकविधस्तथाप्युपहारसन्धिमैत्रीसन्ध्योरेव प्राधान्यमुक्तम्—

एक एवोपहारस्तु सन्धिरेष मतो हि नः ।
उपहारस्य भेदास्तु सर्वेऽन्ये मैत्रवर्जिताः ॥
अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्तते ।
उपहाराहते यस्मात्सन्धिरन्यो न विद्यते ॥

मैत्रीसन्धिस्तु समयोरेव। क्वचिदन्यजयार्थं विषमयोरपि भवति। कन्यादानाद्युपकारसंधयस्त्वनयोरेवान्तर्भवन्ति । अतो न ते पृथक् निरूपिताः । अत्रासन्धेयानाह कामन्दकः—

बालो वृद्धो दीर्घरोगस्तथा ज्ञातिबहिष्कृतः ।
भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥
विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिभाक् ।
दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अक्षेशस्थो बहुरिपुर्युक्तः कालेन यश्च न ।
एतैः सन्धिर्न कुर्वीत विगृह्णीयात्तु केवलम् ॥
एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशम् ।

तथा—

सन्धिः कार्योऽप्यनार्येण संप्राप्योत्सादयेद्धि सः ।
संघातवान्यथा वेणुर्निबिडैः कंटकैर्वृतः ॥
न शक्यते समुच्छेत्तुं भ्रातृसंघातवांस्तथा ।
बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ॥
प्रतिवातं हि न घनः कदाचिदुपसर्पति ।
बलीयसि प्रणमतां काले विक्रमतामपि ॥
संपदो न विसर्पन्ति प्रतीपमिव निम्नगाः ।
राजा न गच्छेद्विश्वासं सन्धितोऽपि हि बुद्धिमान् ॥
अद्रोहसमयं कृत्वा वृत्रमिन्द्रः पुरावधीदिति ।

इतिसन्धिः

अथ विग्रह उक्तो नीतिसारे—

आत्मनोऽभ्युदयाकांक्षी पीड्यमानः परेण वा ।
देशकालबलोपेतः प्रारभेतेह विग्रहम् ॥

तत्र विग्रहकरणान्याह कामन्दकः—

राज्यस्त्रीस्थानदेशानां पानस्य च धनस्य च ।
अपहारो मदो मानः पीडा वैषयिकी तथा ॥

वैषयिकी देशसंबन्धिनी ।

मित्रार्थे चापमानश्च तथा बन्धुविनाशनम् ।
भूतानुग्रहविच्छेदस्तथा मण्डलदूषणम् ॥
एकार्थाभिनिवेशित्वमिति विग्रहयोनयः ।

कर्तव्याकर्तव्यविग्रहावाह स एव—

तदात्वफलसंयुक्तमायत्यां फलवर्जितम् ।
आयत्यां फलसंयुक्तं तदात्वे विफलं स्मृतम् ॥

उभयोः फलवानुत्तमः । एवं त्रैविध्यम् । उभयमपि मध्यमम् । यस्तु तदात्वायत्योरफलः सोऽधमः । विग्रहशमनं चावश्यं कुर्यादित्याह स एव—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुर्यादर्थपरित्यागं एकार्थाभिनिवेशने ।
धनापचारे जाते तु विरोधं न समाचरेत् ॥
कदाचिद्विग्रहे पुंसां सर्वनाशस्तु जायते ।
सर्वोपायैरतो राजा विग्रहं न समाचरेत् ॥
उपायान्तरनाशे तु स्वन्तं विग्रहमाचरेदिति ॥

इति विग्रहः

यानमाह कामन्दकः—

गुणानुरागप्रकृतेर्यात्रा यानमिति स्मृतमिति ।

तत्कालं मनुराह—

मार्गशीर्षे शुभे मासे यायाद्यात्रां महीपतिः ।
फाल्गुने वाथ चैत्रे वा मासं प्रति यथाबलम् ॥
अन्येष्वपि च मासेषु यदा पश्येद्ध्रुवं जयम् ।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः ॥

वर्षादिष्वपीत्यर्थः । मिहिरोऽपि—

यात्रा नृपस्य शरदीष्टफला मधौ च
छिद्रं रिपोर्न नियमोऽस्ति तु केचिदाहुरिति ।

तद्भेदा उक्ता नीतिसारे—

विगृह्य संधाय तथा संभूयाथ प्रसंगतः ।
उपेक्षया च निपुणैर्यानं पञ्चविधं स्मृतम् ॥
विगृह्य याति हि यदा सर्वान् शत्रोर्गणान्बलात् ।
विगृह्य यानं यानज्ञास्तदाचार्याः प्रचक्षते ॥
अरिमित्राणि सर्वाणि स्वमित्रैः सर्वतो बलात् ।
विगृह्य चारिभिर्गन्तुं विगृह्य गमनं स्मृतम् ॥
संधायान्यत्र या यात्रा पार्ष्णिग्राहेण शत्रुणा ।
संधाय गमनं प्रोक्तं तज्जिगीषोः फलार्थिनः ॥
एकीभूय यदैकत्र सामंतैः सांपरायिकैः ।
शक्तिशौर्ययुतैर्यानं संभूय गमनं हि तत् ॥
अन्यत्र प्रस्थितः सङ्गादन्यत्रैव च गच्छति ।
प्रसंगयानं तत्प्रोक्तमत्र शल्यो निदर्शनम् ॥
रिपुं यातस्य बलिनः संप्राप्याविकृतं फलम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपेक्ष्य तस्मिन्यद्यानमुपेक्षायानमुच्यते ॥
निवातकवचान्हित्वा हिरण्यपुरवासिनः ।
उपेक्षायानमास्थाय निजघान धनञ्जयः ॥ इति ।

यानं चाग्रे पुनर्निरूपयिष्यामः ।

इतियानम्

आसनमुक्तं नीतिसारे—

परस्परस्य सामार्थ्याद्विघातादासनं स्मृतमिति ।

तथा—

यदा दुर्गस्थितः शत्रुर्ग्रहीतुं नैव शक्यते ।
विगृह्यैनं तदासीतच्छित्वास्यासारवीवधान् ॥
विच्छिन्नवीवधासारं प्रक्षीणयवसेन्धनम् ।
विगृह्यमाणप्रकृतिं कालेनैव शमं नयेत् ॥
अरेश्च विजिगीषोश्च विग्रहे हीयमानयोः ।
सन्धाय यदवस्थानं संधायासनमुच्यते ॥

सर्वत्र च देशकालानुरोधेनासनं कार्यमिति ।

इत्यासनम्

द्वैधीभावोऽप्युक्तो नीतिसारे—

द्वैधीभावेन तिष्ठेत काकादिवदलक्षितं इति ।

तथा—

द्वैधीभावो द्विधा प्रोक्तः स्वतन्त्रपरतन्त्रयोः ।
स्वतन्त्र उक्तो ह्यन्यस्तु यः स्यादुभयवेतनः ॥

इतिद्वैधम्

आश्रय उक्तः कामन्दकेन—

उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः ।
कुलोद्गतं सत्यमार्यमाश्रयेत बलोत्कटम् ॥
बुध्यैवोपक्रमः श्रेयान् फलनिष्पत्तये सदा ।
उपायेन पदं मूर्ध्नि न्यस्यते मत्तहस्तिनाम् ॥
अयोऽभेद्यमुपायेन द्रवतामुपनीयते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोकप्रसिद्धमेवैतद्वारिवह्नेर्नियामकम् ॥
उपायोपगृहीतेन तेनैतत्परिशोष्यते ।

उपायः कटाहादिप्रक्षेपः । अतः सर्वमुपायेन कुर्यादित्यर्थः ।

मनुः—

यदि तत्रापि संपश्येद्दोषं संश्रयकारितम् ।
सुयुद्धमेव तत्रापि निर्वितर्कः समाश्रयेत् ॥

इत्याश्रयः

एवंविधं मन्त्रं मन्त्रिभिः षाड्गुण्यविदा ब्राह्मणेन च सह कुर्यात् ।

मनुः—

सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रव इति ॥

तान्द्वादशराजमण्डलोक्त्याह याज्ञवल्क्यः—

अरिर्मित्रमुदासीनोऽनन्तरस्तत्परः परः ।
क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः ॥

ते च त्रयस्त्रिविधाः।सहजाः कृत्रिमाः प्राकृताश्चेति । तत्र सहजोऽरिः सापत्नभ्रातृपितृव्यतत्पुत्रादिः । कृत्रिमो रिपुर्यस्यापकृतं येनापकृतं वा । प्राकृतश्चानन्तरदेशाधिपतिः । सहजं मित्रं भागिनेयपैतृष्वस्रीयमातृष्वस्रीयादि । कृत्रिमं मित्रम्, येनोपकृतं यस्य चोपकृतम् । प्राकृतं मित्रमेकान्तरितदेशाधिपतिः । सहजकृत्रिमशत्रुमित्रलक्षणरहितौ सहजकृत्रिमोदासीनौ । प्राकृतोदासीनो व्यन्तरदेशाधिपतिः । अरिः पुनश्चतुर्विधः । पातव्योच्छेत्तव्यपीडनीयकर्शनीयभेदेन । तत्र पातव्योऽनन्तरदेशाधिपतिः । व्यसनी हीनबलो रिक्तप्रकृतिः विदुर्गो मित्रहीनो दुर्बलश्चोच्छेत्तव्यः । पीडनीयो मन्त्रबलहीनः । प्रबलमन्त्रयुक्तः कर्शनीयः ।

तथा च राजमानसोल्लासे—

निर्मूलनाशमुच्छेदं पीडनं बलिनिग्रहम् ।
कर्शनं तु पुनः प्राहुः कोशदण्डापकर्शनादिति ॥

मित्रं च द्विविधम् । बृंहणीयं कर्शनीयमिति । कोशबलहीनं बृंहणीयम् । कोशबलाधिकं कर्शनीयम् । प्राकृतारिमित्रोदासीनानाह । अनन्तरस्तत्परः पर इति । अनन्तरः प्राकृतोऽरिस्तत्परः प्राकृतं मित्रम् । तस्मात्परः प्राकृत उदासीनः । शेषाः पुनः प्रसिद्धत्वान्नोक्ताः । एतद्राज-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मण्डलं क्रमशः पूर्वादिक्रमेण चिन्त्यम्, एवं चतुर्दिक्षु त्रयस्त्रय आत्मा चैक इति त्रयोदशराजकं मण्डलं पद्माकारम्। ये च पार्ष्णिग्राहादयस्तेऽप्यत्रैवान्तर्भवन्ति। सामादिभिरित्युक्तं तान्सामादीनुपायानाह याज्ञवल्क्यः—

उपायाः साम दानं च भेदो दण्डस्तथैव च।
सम्यक् प्रयुक्ताः सिद्ध्येयुर्दण्डस्त्वगतिकागतिः॥

भेदः शत्रुसामन्तादीनां परस्परं वैरोत्पादनम्। स एव—

स जेतुं न्यायतोऽशक्यो लुब्धेनाकृतबुद्धिना।
सत्यसंधेन शुचिना सुसहायेन धीमता॥
यथाशास्त्रं प्रयुक्तः स सदेवासुरमानुषम्।
जगदानन्दयेत्सर्वमन्यथा तु प्रकोपयेत्॥
अधर्मदण्डनं स्वर्गकीर्तिलोकविनाशनम्।
सम्यक्तु दण्डनं राज्ञः स्वर्गकीर्तिजयावहम्।

मनुः—

अदण्ड्यान्दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकं चैव गच्छतीति॥

दण्डप्रकारं दण्ड्यादण्ड्यव्यवस्थां व्यवहारमयूखे दर्शयिष्यामः। एवं मन्त्रयित्वान्तःपुरं शोधयित्वा प्रविशेत्। यथोक्तम्—

कारयेद्भवनशोधनमादौ
मातुरन्तिकमपि प्रविविक्षुः।
आप्तशस्त्र्यनुगतश्च विशेच्च
संकटे च गहने च न तिष्ठेत्॥

तथा—

निर्गमे च प्रवेशे च राजा मार्गे समंततः।
प्रोत्सारितजनं गच्छेत्सम्यगाविष्कृतोन्नतिः॥
यात्रोत्सवसमाजे तु जलसंबाधशालिनः।
प्रदेशान्नावगाहेत नातिवेलं च संपतेत्॥
निषेवितो वर्षधरैः कंचुकोष्णीषशालिभिः।
अन्तःपुरे च विचरेत्कुब्जकैरातवामनैः॥
नीचैरन्तःपुरामात्याः शुचयश्चित्तवेदिनः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शस्त्राग्निविषवर्जं हि नर्मयेयुर्महीपतिम् ॥

अन्तःपुरशोधनमाह कामन्दकः—

आशीतिकाश्च पुरुषाः पञ्चाशीत्यश्च योषितः।
बुध्येरन्न च रोधानां शौचमागारिकाश्च ये ॥
अभ्यन्तरगतोऽपीह विश्वासं स्त्रीषु न व्रजेत्।
देवीगृहगतं भ्राता भद्रसेनमहारयत् ॥
मातुः शय्यान्तरे लीनः कारूषं चौरसः सुतः।
न हि देवीगृहं गच्छेदात्मीयात्संन्निवेशनात् ॥

तथा स्त्रीणां चरितमुक्तं नीतिसारे—

विशेषेण तु संयोज्यमधुनेति विलोभितम्।
देवी तु काशिराजेन्द्रं निजघान रहोगतम् ॥
विषाक्तेन च सौवीरं मेखलामणिना नृपम्।
वेण्यां शस्त्रीं समादाय तथा चापि विदूरथम् ॥
इतिवृत्तं परिहरेन्नरांश्चापि प्रयोजयेत्।
यस्य दाराः सुगुप्ताः स्युः पौरुषैराप्तकारिभिः ॥
सर्वलोकान्वितं तस्य हस्ते लोकद्वयं स्थितम्।

एवं सावधानोन्तःपुरं प्रविशेत्।

अथ भार्यागमनमुक्तं कामन्दकेन—

धर्ममिच्छन्नरपत्निः सर्वान्दाराननुक्रमम्।
गच्छेदनुनिशं नित्यं वाजीकरणबृंहितः ॥

वाजीकरणादिकं च कामशास्त्रादवगन्तव्यं विस्तृतिभयान्नेह निरूपितम्। नीतिसारे—

विचार्य कार्यावयवान् दिनक्षये
विसृज्य लोकं प्रमदाहृतक्रियः।
सशस्त्रबन्धेन हि साधुपाणिना
स्वपित्यसक्तः परमाप्तरक्षितः ॥

तथा—नयेन जाग्रत्यनिशं नरेश्वरे
सुखं स्वपन्तीह निराधयः प्रजाः।
प्रमत्तचित्ते सति जाग्रति प्रजाः
प्रजागरेणास्य जगत्प्रबाधते ॥ इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं तिष्ठतः फलमाह वराहमिहिरः—

आचारस्थः सागरान्तां धरित्रीं
भुङ्क्ते दीर्घं कालमुत्खातशत्रुः ।
यत्राचारस्तत्र धर्मस्य वृद्धि-
र्धर्माद्भोगान्देहभेदेऽपि भुङ्क्ते ॥

भारते—

धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोह एताश्च समिधः श्रियः ॥

समिधो, वर्द्धनानि ।

इति सपरिकरस्वामिनिरूपणम् ।

अथामात्यः ।

तत्र पुत्रोऽप्यमात्यमध्ये परिगणितो नीतिसारे—

अमात्यो युवराजश्च भुजावेतौ महीपतेरिति ।

राजपुत्रस्य कृत्यमुक्तम्—

पितृसेवापरस्तिष्ठेत्कायवाङ्मानसैः सदा ।
तत्कर्म कुर्यान्नियतं येन तुष्टो भवेत्पिता ॥
तन्न कुर्याद्येन पिता मनागपि विषीदति ।

तथा—

यस्मिन् पितुर्भवेत्प्रीतिः स्वयं तस्मिन् प्रियं चरेत् ।
यस्मिन् द्वेषं पिता कुर्यात्स्वस्यापि द्वेष्य एव सः ॥
असंमतं विरुद्धं च पितुर्नैव समाचरेत् ।
प्राप्यापि युवराजत्वं प्राप्नुयाद्विकृतिं न च ॥
स्वसंपत्तिमदान्नैव मातरं पितरं तथा ।
भ्रातरं भगिनीं चापि अन्यान्वा राजवल्लभान् ॥
महाजनांस्तथा राष्ट्रे नाऽवमन्येन्न पीडयेत् ।
प्राप्यापि महतीं वृद्धिं वर्तेत पितुराज्ञया ॥
पुत्रस्य पितुराज्ञा हि परमं भूषणं स्मृतम् ।
सोदरेषु च सर्वेषु नाधिक्यं संप्रदर्शयेत् ॥
भ्रातृणामवमानेन बहवो हि विनाशिताः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पितुराज्ञोल्लंघनेन प्राप्यापि पदमुत्तमम् ॥
तस्माद्भ्रष्टा भवन्तीह दासवद्राजपुत्रकाः ।
एवं गृहाविरोधेन राजपुत्रो वसन् गृहे ॥
त्यागी च सत्वसंपन्नः सर्वान्कुर्याद्वशे स्वके ।
शनैः शनैः प्रवर्द्धेत शुक्लपक्षमृगाङ्कवत् ॥
एवंवृत्तो राजपुत्रो राज्यं प्राप्याप्यकण्टकम् ।
सहायवान् महामात्यो चिरं भुंक्ते वसुंधराम् ॥

एतच्च राजपुत्रे विशेषमात्रमुक्तम् । सामान्यास्तु पूर्वोक्ता वक्ष्यमाणाश्च गुणाः सर्वे अपेक्षिता एव । तेषां राजपुत्राणां रक्षणं प्रयत्नतः कुर्यादित्याह कामन्दकः—

प्रजार्थं श्रेयसे राजा कुर्वीतात्मजरक्षणम् ।
लोलुभ्यमानास्तेऽर्थेषु हन्युरेनमरक्षिताः ॥
राजपुत्रा मदोद्धूता गजा इव निरंकुशाः ।
भ्रातरं चाभिनिघ्नन्ति पितरं चाभिमानिनः ॥
राजपुत्रैर्मदोद्धूतैः प्रार्थ्यमानमितस्ततः ।
दुःखेन रक्ष्यते राज्यं व्याघ्राघ्रातमिवामिषम् ॥
रक्ष्यमाणा यदिच्छिद्रं कथंचित्प्राप्नुवन्ति ते ।
सिंहशावा इव घ्नन्ति रक्षितारमसंशयम् ॥
विनयोपग्रहान् भृत्यैः कुर्वीत नृपतिः सुतान् ।
अविनीतकुमारं हि कुलमाशु विनश्यति ॥
विनीतमौरसं पुत्रं यौवराज्येऽभ्यषेचयेत् ।
दुष्टं गजमिवोद्वृत्तं कुर्वीत सुखबन्धनम् ॥

तथा—

लालनीयः पालनीयो भूषणीयस्तथैव च ।
अर्थशास्त्रं शिक्षणीयो यथा स्याद्विनयी सुतः ॥

दुर्वृत्तं प्रत्याह—

राजपुत्रः सुदुर्वृत्तः परित्यागं हि नार्हति ।
क्लिश्यमानः स पितरं परानाश्रित्य हन्ति हि ॥
व्यसने सज्जमानं हि क्लेशयेद्व्यसनाश्रयैरिति ।

इति राजपुत्रनिरूपणम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमात्यस्त्रिविधः उत्तममध्यमाधमभेदात् ।
तदुक्तं महाभारते—

त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः ।
तेषां च समवेतानां गुणदोषान्वदाम्यहम् ।
मन्त्रिभिर्हितसंयुक्तैः समर्थैरर्थनिश्चये ।
मित्रापित्रैव समानार्थैर्बान्धवैरप्यगर्हितैः ।
संमन्त्रयित्वा यः कर्म प्रारंभे संप्रवर्तते ।
धैर्याच्च कुरुते यत्नं तमाहुः पुरुषोत्तमम् ॥
एकोर्थान्विमृशत्येको धर्मे च कुरुते मतिम् ।
एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ॥
गुणदोषावनिश्चित्य दैवमेव व्यपाश्रितः ।
करिष्यामीति यः कार्योपेक्षकः स नराधम इति ।

याज्ञवल्क्यः—

स मंत्रिणः प्रकुर्वीत प्राज्ञान्मौलान् स्थिरान् शुचीन् ।
तैः सार्द्धं चिन्तयेद्राज्यं विप्रेणाथ ततः स्वयमिति ॥

मनुः संख्यामप्याह—

मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्भवान् ।
सचिवान्सप्त चाष्टौ वा कुर्वीत सुपरीक्षितानिति ॥

लब्धलक्षांश्चतुरान् । मौलान्स्ववंशपरंपरायातान् ।

नीतिसारे—

कुलीनाः शुचयः शूराः श्रुतवन्तोऽनुरागिणः ।
दण्डनीतेः प्रयोक्तारः सचिवाः स्युर्महीपतेः ॥

तथा—

स्मृतिस्तत्परतार्थेषु वितर्को ज्ञाननिश्चयः ।
दृढतामनुगुप्तिश्च मन्त्रिसंपत्प्रकीर्तिता ॥
सज्जमानमकार्येषु निरुध्युर्मन्त्रिणो नृपम् ।
गुरूणामिव चैतेषां शृणुयाद्वचनं नृपः ॥

पुरोहितकृत्यं तत्रैव—

त्रय्यां च दण्डनीत्यां च कुशलोऽस्य पुरोहितः ।
अथर्वविहितं कर्म कुर्याच्छान्तिकपौष्टिकम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तादृक्सांवत्सरोऽप्यस्य ज्योतिःशास्त्रस्य चिन्तकः ।
प्रश्नाभिधानकुशलो होरागणिततत्त्ववित् ॥

इत्यमात्यादिनिरूपणम् ।

सुहृन्निरूपणं तु प्रायशः पूर्वं कृतमेव । गुणास्तु केचनोच्यन्ते । अमात्यानां सेवकमध्येन्तर्भावः । सुहृदस्तु मित्राणीति भेदः, तेषां कृत्यमुक्तं कामन्दकेन—

नृपस्य ते हि सुहृदस्त एव गुरवो मताः ।
य एनमुत्पथगतं वारयन्त्यनिवारिताः ॥
सज्जमानमकार्येषु सुहृदो धारयन्ति ये ।
सत्यं तेनैव सुहृदो गुरवो गुरवो हि ते ॥
कृतविद्योऽपि बलिना व्यक्तरागेण रज्यते ।
रागानुरक्तचित्तः सन् किं न कुर्यादसांप्रतम् ॥

तथा—

त्यागविज्ञानसत्याढ्यं महापक्षं प्रियंवदम् ।
आयतिक्षेममद्वेष्यं मित्रं कुर्वीत सत्कुलम् ॥
समुत्पन्नेषु कृच्छ्रेषु दारुणेष्वप्यसंशयम् ।
दर्शयत्यच्छहृदयः कुलीनश्चतुरस्रताम् ॥
धर्मार्थकामसंयोगो मित्रात्तु त्रिविधं फलम् ।
यस्मादेतत्त्रयं न स्यात्तन्न सेवेत पण्डितः ॥
शुचिता त्यागिता शौर्यं समानसुखदुःखता ।
अनुरागश्च दाक्ष्यं च सत्यता च सुहृद्गुणाः ॥
तदर्थेहानुरागश्च संक्षिप्तं मित्रलक्षणम् ।
यस्मिन्नैतन्न तन्मित्रं तत्रात्मानं न निक्षिपेत् ॥

न विश्वसेदित्यर्थः ।

प्रायो मित्राणि कुर्वीत सर्वावस्थासु भूपतिः ।
बहुमित्रो हि शक्नोति वशे स्थापयितुं रिपून् ॥
न तत्र तिष्ठति भ्राता न पितान्योऽपि वा जनः ।
पुंसामापत्प्रतीकारे सन्मित्रं यत्र तिष्ठति ॥
अमित्रान्सर्वतो मित्रैर्निगृह्णीयादृढव्रतैरिति ।

इति सुहृन्निरूपणम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोशः

अथ कोशः । तस्य मुख्यत्वमाह वराहमिहिरः—

कोशो हि राज्यतरुमूलमतो हि शाखाः
पक्षी विपक्ष इव किं निधनः करोति ।
अन्नादिवेन्द्रियगणो वसुतस्तथान्नं
तत्प्राप्तिरक्षणविवृद्धिषु यत्नवान्स्यात् ॥

भारते—

मधुदोहं दुहेद्राष्ट्रं भ्रमरा इव पादपम् ।
वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत् ॥

विकुट्टयेत् शोषयेत् ।

तथा—

यः कश्चिज्जनयेदर्थं राज्ञा रक्ष्यः स मानवः ।
यो राजकोशं नश्यन्तमाचक्षीत युधिष्ठिर ॥
श्रोतव्यमस्य च रहो रक्ष्यश्चामात्यतो भवेत् ।
अमात्या ह्युपहर्तारं ज्ञातिं वा घ्नन्ति भारत ॥

उपहर्तारं राज्ञे निवेदयितारम् ।

राजकोशस्य गोप्तारं राजकोशाधिगोपकाः ।
सर्वे तमनुधावन्ति स विनश्यत्यरक्षितः ॥

अनुधावन्ति मारयितुं धावन्तीत्यर्थः ।

कामन्दकः—

वर्द्धमानोल्पनिस्रावः ख्यातः पूजितदैवतः ।
ईप्सितद्रव्यसंपूर्णो हृद्य आप्तैरधिष्ठितः ॥
मुक्ताकनकरत्नाढ्यः पितृपैतामहोचितः ।
गजेष्वारोपितः साधुशीघ्रयानैरधिष्ठितः ॥
यत्र राजा तत्र कोशः कोशाधीना हि राजता

तथा—

धर्मार्जितो व्ययसहः कोशः कोशज्ञसंमतः ।
धर्महेतोस्तथार्थाय भृत्यानां भरणाय च ॥
आपदर्थं च संरक्ष्यः कोशः कोशवता सदा ।
पुत्रादपि हि संरक्ष्यो भार्यायाः सुहृदस्तथा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीतिसारे—

नान्याय्यं च व्ययं कुर्यात्प्रत्यवेक्षेत चान्वहम् ।
कृषिर्वणिग्यशोदुर्गं सेतुः कुञ्जरबन्धनम् ॥
खन्यः करधनादानं स्वस्थचित्तोऽपि वर्द्धयेदिति ।

भागा उक्ताः शिवधर्मे—

तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् ।
भागद्वयं तु धर्मार्थमनित्यं जीवितं यतः ॥

भागत्रयं वित्तस्य जीवनाय द्वौ धर्माय । भागपञ्चकं कृत्वा त्रितयं जीवनाय भागद्वयं धर्मायेति हेमाद्रिः ।

कृपणाशक्तविषये भारते—

एकां गां दशगुर्दद्याद्दश दद्याच्च गोशती ।
शतं सहस्रगुर्दद्यात्सर्वे समफलाः स्मृताः इति ॥

दशांशं दद्यादिति भावः ॥

इति कोशः ।

राष्ट्रमुक्तं नीतिसारे—

राज्यांगानां तु सर्वेषां राष्ट्राद्भवति संभवः ।
तस्मात्सर्वप्रयत्नेन राजा राष्ट्रं प्रसाधयेत् ॥
तस्मादसाधून् पापिष्ठान् निघ्नन्पापैर्न लिप्यते ।
ये ये प्रजाः प्रबाधेरँस्तांस्तान् छिन्द्यान्महीपतिः ॥
यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः ।
स धर्मो यं विगर्हन्ति तमधर्मं प्रचक्षते ॥
धर्माधर्मौ विजानन् हि शासनेऽभिरतः सताम् ।
प्रजा रक्षेन्नृपः साधु हन्याच्च परिपन्थिनः ॥
राष्ट्रोपघातं कुर्वीरन् ये पापा राजवल्लभाः ।
एकैकशः संहतान्वा दूष्यांस्तान्परिचक्षते ॥
दूष्यानुपांशुदण्डेन हन्याद्राजा विलंबितम् ।
अदृश्यं वा प्रकाशं वा लोकद्वेषं समाश्रितान् ॥

तथा—

अरक्ष्यमाणाः कुर्वन्ति यत्किंचित्किल्बिषं प्रजाः ।
तस्मात्तु नृपतेरर्द्धं यस्माद्गृह्णात्यसौ करान् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षितः ।
अधर्मादऽपि षड्भागो भवत्यस्य ह्यरक्षितुः ।।
यथा बीजांकुरः सूक्ष्मः परिपुष्टोभिरक्षितः ।
काले फलाय भवति साधुस्तद्वदियं प्रजा ।।
उद्वेजयति तीक्ष्णेन मृदुना परिभूयते ।
तस्माद्यथार्हतो दण्डं नयेत्पक्षमनाश्रितः ।।

याज्ञवल्क्यः—

पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषत इति ।

भारतेऽपि—

उच्छिद्यते धर्मवृत्तमधर्मो वर्तते महान् ।
भयमाहुर्दिवारात्रं यदा पापो न वार्यत इति ।

राजधर्मेषु—

विक्रयं क्रयमध्वानं भक्तं च सपरिव्ययम् ।
योगक्षेमं च संप्रेक्ष्य वणिजः कारयेत्करान् ।।
उत्पत्तिं दानवृत्तिं च शिल्पं संप्रेक्ष्य वा सकृत् ।
शिल्पं प्रति करानेव शिल्पिनः प्रति कारयेत् ।।
तथा पन्था न हीयेरन् प्रजाः कुर्यान्महीपतिः ।
संत्यजन्ति परिख्यातं राजानमतिखादिनम् ।।
न कर्म कुरुते वत्सो भृशं दुग्धो युधिष्ठिर ।
राष्ट्रमप्यतिदुग्धं हि न कर्म कुरुते महत् ।।
यो राष्ट्रमनुगृह्णाति परिगृह्य स्वयं नृपः ।
संजातमुपजीवन्स लभते सुमहत्फलम् ।।
पौरान् जानपदान्सर्वान् संश्रितोपाश्रितांस्तथा ।
यथाशक्त्यनुकंपेत सर्वानप्यधनानपि ।।

तथा—

प्रचारं भृत्यभरणं व्यसनं ग्रामतो भयम् ।
योगक्षेमं च संप्रेक्ष्य गोमिनः कारयेत्करम् ।।

तथा—

दयावानप्रमत्तश्च करान्संप्रणयेन्मृदूनिति ।।

इतिराष्ट्रम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुर्गकरणार्थं भुवमाह कामन्दकः—

भूगुणैर्वर्धते राष्ट्रं तद्वृद्धिर्नृपवृद्धये ।
तस्माद्गुणवतीं भूमिं भूत्यै भूपस्तु कारयेत् ॥
सस्याकरवती पुण्या खनिद्रव्यसमन्विता ।
गोहिता भूरिसलिला पुण्यैर्जनपदैर्वृता ॥
रम्या सकुंजरवना वारिस्थलपथान्विता ।
अदेवमातृका चेति शस्यते भूर्विभूतये ॥

निषिद्धभूमिमाह स एव—

सशर्करा सपाषाणा साटवी नित्यतस्करा ।
रूक्षा सकंटकवना सव्याला चेति भूरभूः ॥

रूक्षान्यदेशापेक्षया चतुर्गुणपञ्चगुणादिजलसेकेन सस्यजननी ।

जनपदमाह स एव—

स्वाजीव्यो भूगुणैर्युक्तः सानूपः पर्वताश्रयः ।
शूद्रकारुवणिक्प्रायो महारंभकृषीवलः ॥
सानुरागो रिपुद्वेषी पीडाकरसहः पृथुः ।
नानादेश्यैः समाकीर्णो धार्मिकः पशुमान् धनी ॥
तं वर्द्धयेत्प्रयत्नेन तस्मात्सर्वं प्रवर्तते ॥

पुरमाह—

पृथुसीममहाखातमुच्चप्राकारगोपुरम् ।
समावसेत्पुरं शैलं सरिन्मरुवनाश्रयम् ॥

याज्ञवल्क्यः—

रम्यं पशव्यमाजीव्यं जांगलं देशमावसेत् ।
तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये ॥

पशव्यं पशुवृद्धिकरम्, कन्दमूलफलादिभिराजीव्यम् । जाङ्गलं स्वजलतरुपर्वतम् ।

दुर्गमाह मनुः—

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च ।
नृदुर्गं गिरिदुर्गं च समाश्रित्यावसेत्पुरम् ॥

कामन्दकस्तु ऐरिणमपि पपाठ—

औदकं पार्वतं वार्क्षमैरिणं धन्व मानवम् ।
प्रशस्तं शास्त्रमतिभिर्दुर्गं दुर्गोपचिन्तकैः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इरिणमूषरम् । धन्व निरुदकं स्थलं मरुभूमिरित्यर्थः । महीदुर्गमित्यत्र मह्यां दुर्गं महीरूपमेव वा । तच्च मार्त्तिकं पाषाणमैष्टकं वा ।

तथाच महाभारते—महीदुर्गापेक्षया मृद्दुर्गस्य पृथङ्निर्देशः कृतः ।

धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च ।
मनुष्यदुर्गं मृद्दुर्गं वनदुर्गं च तानि षडिति ॥

बन्धुदुर्गं सोदरादिबन्धूनां राजगृहस्य परितः स्थानानि । तत्र बन्धुदुर्गमनुष्यदुर्गयोः पृथग्ग्रहणं गोबलीवर्दन्यायेन । अन्तरङ्गत्वाच्छूरत्वाच्च बन्धूनां पृथङ्निर्देशः ।

तथा—

यावद्बन्धुदुर्गं संभवति तावदितरमनुष्यदुर्गं न कुर्वीतेति । एवं च दुर्गस्य नवत्वं संपद्यते । धन्वदुर्गं महीदुर्गमित्यत्र द्वे । जलदुर्गं वृक्षदुर्गं नृदुर्गं गिरिदुर्गं बन्धुदुर्गं, ऐरिणदुर्गम् । महीदुर्गे तु मृदादीनां विशेषः पूर्वमुक्त एव ।

दुर्गस्य गुणमाह मनुः—

एकः शतं योधयति प्राकारस्थो धनुर्द्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं समाश्रयेत् ॥

दशगुणा अपि पराभवं प्राप्नुवन्तीत्यर्थः ।

तत्र सर्वदुर्गाणां प्राशस्त्ये च गिरिदुर्गे विशेषमाह मनुः—

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ।
एतेषां बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥

एतेषामिति निर्द्धारणे षष्ठी । तद्विशिनष्टि मनुः—

तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्मन्त्रैर्यवसेनोदकेन्धनैः ॥

मन्त्रैः सर्पादिमन्त्रविद्भिर्मनुष्यैरित्यर्थः ।

भारते दुर्गं प्रकृत्य—

शूरान्यजनसंपन्नं ब्रह्मघोषानुनादितम् ।
वश्यामात्यबलो राजा तत्पुरं स्वयमाविशेत् ॥
तत्र कोशं बलं मित्रं व्यवहारं च वर्द्धयेत् । इति ।

मनुः—

तस्य मध्ये तु पर्याप्तं कारयेद्गृहमात्मनः ।
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम् ॥ इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वर्तुकम् आरामादिषु तत्तदृतुफलिवृक्षसहितं तत्तदृतूद्भवफलपुष्पादिसहितं वा । तत्तदृतूपयोगिसामग्रीसहितं सर्ववस्तुसमन्वितमित्यर्थः ।

इति दुर्गम्

अथ बलम् ।

तत्र मुहूर्ताद्यपेक्षया बलस्य प्राधान्यमाह वराहमिहिरः—

ग्रहर्क्षतिथ्युद्गमराशिहोरा-
द्रेक्काणभागाद्यनुकूलमात्रम् ।
भवेद्धियासोर्यदि सिद्धिहेतुः
स्त्रयं भवेद्दैवविदेव राजा ॥
मन्त्राभिषेकमणिबन्धनशान्तिकर्म-
होमोपवाससुरयागजपादिमात्रम् ।
स्यात्सिद्धिहेतुरथ चेद्विजिगीषतोऽरीन्
कस्मात्तदा नरपतिर्न भवेत्पुरोधाः ॥

तथा—

बुद्ध्वार्थशास्त्राण्यपि मन्त्रिणोऽपि
कुर्युः प्रणामं न नरेश्वराणाम् ।
यद्याभिजात्यद्विपवाजिपत्ति-
कोशाद्यपेक्षा न भवेत्प्रधानम् ॥

अतोऽवश्यं बलकोशाधीनं राज्यम् ।

ननु जयपराजयादिकं सर्वं कर्माधीनं तत्र किं बलादिनेति चेत् उच्यते । न केवलं सर्वं कर्माधीनं किंतु पुरुषकाराधीनमपि ।

उक्तं च याज्ञवल्क्येन—

यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिद्ध्यतीति ॥

माघेऽपि—

नालंबते दैष्टिकतां न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षत इति ॥

कथं तर्हि कचित्पुरुषकारे कृतेपि न फलप्राप्तिः । उच्यते । न वयं कर्मणः कारणत्वमेव खंडयामः किं तु तन्मात्रस्य । वस्तुतस्तु नहि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्म पुरुषकारापेक्षया भिन्नमस्ति। पूर्वजन्मार्जितः पुरुषकारो हि कर्मोच्यते। अतो यदिह जन्मनि द्वाभ्यामेकजातीये प्रयत्ने कृते फलावाप्तिरेकस्यैकस्य न, ततो नूनमेकस्य प्राक्तनः पुरुषकारो नास्ति। पापरूपो वा स प्रतिबन्धक इति कल्प्यते। अतः सर्वं कर्मापरपर्यायपुरुषकाराधीनमेव।

अत एवोक्तं भारते—

स्वकर्मणाऽशुभेनापि शुभेनाप्यथवा जनः।
फलं तदनुरूपं हि प्राप्नोति भरतर्षभ॥

अतएवोत्तरमीमांसायां कस्यचिद्वर्तमानजन्मनि कर्मभिः पापक्षये जाते सन्यासोत्तरं मुक्तिः। यत्र तु कर्मस्वकृतेषु सन्यासोत्तरं मुक्तिस्तत्र पूर्वजन्मार्जितानि कर्माणि कल्प्यन्ते। अत एव क्षत्रियजनकस्य ज्ञानोत्पत्तिं दृष्ट्वा प्राक्तनः संन्यासोऽपि कल्प्यत इत्युक्तम्। अतो यत्र लोकतः शास्त्रतो दृढतरः कार्यकारणभावोऽवगतस्तत्र कार्यं दृष्ट्वा कारणमनुमीयते इति। अतः सर्वत्र प्राक्तन ऐहिको वा पुरुषकारः कारणमिति। अतः पुरुषकार एव राज्ञा कर्तव्य इति। स च बलाधीन इत्यवश्यं बलसंग्रहः कार्यः।

अत्र बलं षड्विधमाह कामन्दकः—

षड्विधं तु बलं व्यूह्य द्विषतोऽभिमुखं व्रजेदिति।

षड्विधं बलमादाय प्रतस्थे दिग्जिगीषयेति कालिदासोपि।

तद्भेदा उक्ता नीतिसारे—

मौलं भूतं श्रेणिसुहृद्द्विषदाटविकं बलम्।
पूर्वं पूर्वं गरीयस्तु बलानां व्यसनं स्मृतमिति॥

पूर्वपूर्वस्य नाशः कठिन इत्यर्थः। तत्र मौलं नाम परंपरागतम्। भूतं यावद्विभवस्थायि। श्रेणिः गमनमार्गे स्थाने स्थाने निवेशितम्। सुहृन्मित्रबलम्। द्विषतां स्वाधीनं यज्जातं तद्द्विषद्बलम्। आटविकं, अरण्यसंबन्धि।

तत्र दूरदेशादौ मूलसहितो गच्छेदित्याह—

प्रकृष्टेऽध्वनि काले वा गच्छेन्मौलैः समावृतः।
मौलास्तु दीर्घकालेऽपि क्षयव्ययसहिष्णवः॥
एषु वस्तुषु मेधावी भूतादीनि विवर्जयेत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दीर्घाध्वकालखिन्नेषु तेषु भेदभयं भवेत् ॥
बहुत्वाद्भूतसैन्यानां दीर्घकालाध्वखेदतः ।
नित्यं प्रवासायासाभ्यां भेदोऽवश्यं प्रजायते ॥

भेदः स्वामिपरित्यागः । एवमन्येषामपि बलानां गुणदोषा ऊहनीयाः । तत्र कस्मिन्काले किं बलं ग्राह्यमित्याह कामन्दकः—

स्फीतसारानुरक्तेन बलेनोपचितः परः ।
तत्तुल्येनैव पातव्यः क्षयव्ययसहिष्णुना ॥

क्वचिद्भूतमपि ग्राह्यमित्याह स एव—

प्रभूतं स्वं भूतबलं मौलमल्पमसारवत् ।
अरेर्वीक्ष्यात्मनस्तद्धि विपरीतं जयेदरीन् ॥

भूतबलेन मौलं जयेदिति विपरीतम् । श्रेणिबलस्योपयोगमाह—

स्फीतं श्रेणिबलं शक्यमाधातुं यानवर्त्मनि ।
नित्यं प्रयासव्यायाममिति श्रेण्या समुत्पतेत् ॥

मित्रबलस्योपयोगमाह—

मित्रसाधारणे कार्ये मित्रायत्ते फलोदये ।
अनुग्राह्ये च पीड्ये च मित्रेणैव सह व्रजेत् ॥

अरिसैन्यस्योपयोगमाह—

प्रभूतेनारिसैन्येन योधयेन्महतो रिपून् ।
अत्युच्छ्रितं कोपनयादभ्यासेन रिपोर्बलम् ॥
वासयेत्कर्षयेच्चैनं दुर्गकण्टकशोधनैः ॥

आटविकस्योपयोगमाह—

नित्यमाटविकं सैन्यं दुर्गकण्टकशोधने ।
परदेशप्रवेशे च पुरः कुर्वीत पण्डितः ॥ इति ।

पूर्वोक्तबलस्य चतुरङ्गतामाह—

हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुर्विधमिति ।

अथ गजनिरूपणम् ।

चतुर्विधा गजाः । भद्रा मन्दा मृगा मिश्राश्चेति ।

तल्लक्षणमाह वराहमिहिरः—

मध्वाभदन्ताः सुविभक्तदेहाः
नचोपदिग्धा न कृशाः क्षमाश्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गात्रैः समैश्चापसमानवंशाः
वराहतुल्यैर्जघनैश्च भद्राः ॥

चापं वंशस्य तत्तुल्यपृष्ठाः ।

वक्षोऽथ कक्षा वलयः श्लथाश्च
लंबोदरस्त्वक्बृहती गलश्च ।
स्थूला च कुक्षिः सह मेचकेन
सैंही च दृक् मन्दमतङ्गजस्य ॥

कक्षाऽग्रिमपादद्वयोरुसन्धिः । सैंही सिंहसदृशच्छविरित्यर्थः ॥

मृगास्तु ह्रस्वाधरबालमेढ्रा-
स्तन्वंघ्रिकण्ठद्विजहस्तकर्णाः ।
स्थूलेक्षणाश्चेति यथोक्तलिङ्गैः
संकीर्णनागा व्यतिमिश्रसंज्ञाः ॥

मिश्रत्वं भद्राणां मन्दादिसंगेन । एवमन्यत्रापि ।

अथ परिमाणमाह ।

पञ्चोन्नतिः सप्त मृगस्य दैर्घ्ये
अष्टौ च हस्ताः परिणाहमानम् ।
एकद्विवृद्धावथ मन्दभद्रौ
संकीर्णनागे नियतप्रमाणः ॥

मन्दस्य षडुन्नतिः अष्टौ दैर्घ्यम् । नवोदरपरिणाहः । भद्रस्य सप्तोन्नतिः । नवदैर्घ्यं दशपरिणाहाः । अन्यत्स्पष्टम् । अत्र ह्रस्वस्तिर्यग्यवोदराणीति कल्पनेन कार्यः ।

तेषां मदवर्णमाह स एव—

भद्रस्य वर्णो हरितो मदश्च
मन्दस्य हारिद्रकसन्निकाशः ।
कृष्णो मृगस्याभिहितो मदस्य
संकीर्णनागस्य मदो विमिश्रः ॥

गजप्राशस्त्यमाह—

ताम्रोष्ठतालुवदनाः कलविंकनेत्राः
स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चापोन्नतायतनिमग्ननिगूढवंशाः
तन्वेकरोमचितकूर्मसमानकुंभाः ॥

कलविंकश्चटकः । तनून्येकजातीयानि रोमाणि तैः ।

तथा—

विस्तीर्णकर्णहनुनाभिललाटगुह्याः
कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च ।
रेखात्रयोपचितवृत्तकराः सुबाला
धन्याः सुगन्धिमदपुष्करमारुताश्च इति ॥

द्विनवाष्टादशविंशतिर्वा नखानि कूर्मोन्नतानि । पुष्करं शुंडाग्रम् ।

तथा—

मूलमध्यदशनाग्रसंस्थिता
देवदैत्यमनुजाः क्रमात्ततः ।
दन्तभङ्गफलमत्र दक्षिणे
भूपदेशबलविद्रवप्रदम् ॥
वामतः सुतपुरोहिते भयं
हन्ति साटविकदारनायकान् ॥

आटविकोऽटव्यामधिकृतस्तत्सहिता दारनायका दाराधिकृताः पुरुषास्तान् हन्ति । भयं करोतीत्यध्याहारः ।

तथा—

आदिशेदुभयगर्भदर्शना-
त्पार्थिवस्य सकलं कुलक्षयम् ।
सौम्यलग्नतिथिभादिभिः शुभं
वर्द्धते शुभमतोऽन्यथा परम् ॥
क्षीरिमिष्टफलपुष्पपादपै-
श्चापगातटविघट्टनेन च ।
वाममध्यरदभङ्गखण्डनं
शत्रुनाशकृदतोऽन्यथा परम् ॥

वल्मीकस्याणुगुलमं क्षुपतरुमथनः स्वेच्छया हृष्टदृष्टि-
र्यायाद्यात्रानुकूलं त्वरितपदगतिर्वक्त्रमुन्नाम्य चोच्चैः ।
भक्ष्यासन्नाहकाले जनयति च मुहुः शीकरं बृंहते वा
तत्कालं वा मदाप्तिर्जयकृदथ रदं वेष्टयन्दक्षिणं च ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्खलितगतिरकस्मात्रस्तकर्णोऽतिदीनं
श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम् ।
द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो
भयकृदहितभक्षी नैकशोऽसृक्शकृच्च ॥

अहितभक्षी रोगजनकतृणादिभक्षी । असृक् रुधिरं तत्सहितं शकृत् ।

तथा—

प्रवेशनं वारिणि वारणस्य
ग्राहेण नाशाय भवेन्नृपस्य ।
ग्राहं गृहीत्वोत्तरणं द्विपस्य
तोयात्स्थले वृद्धिकरं परं स्यात् ॥

बन्धनभूमीराह—

भद्रमन्दमृगमिश्रदन्तिनां
श्वेतरक्तकनकोपमाः सिताः ।
भूमयो द्विरदपुष्टिवृद्धिदा
भूभुजामपि यशःसुखावहाः ॥

शाला आह—

ज्येष्ठा चतुर्विंशतिरेव हस्ता
द्विद्व्यूनिते मध्यजघन्यशाले ।
विस्तारतस्तद्द्विगुणाश्च दीर्घाः
स्तंभाश्च विस्तारसमुच्छ्रिताः स्युः ॥

एते च शालास्तंभाः । अत्र पूर्वोक्तपरिमाणमध्ये बहूनां हस्तिनामसन्निवेशात्प्रतिहस्ति पूर्वोक्ता शाला ज्ञेया । स्तंभानां परिणाहमाह—

ज्येष्ठोंऽगुलानि बहुलो दशषड्युतानि
मध्यस्तु पञ्चदशकन्यसकोंऽगुलोनः ।
स्तंभप्रमाणविपुलाः क्रमशो निषंगाः
प्रक्तांगुलार्द्धसदृशं बहुलत्वमेषाम् ॥

निषंगा बन्धनरज्जवः । द्वारमाह—

द्वारोच्छ्रयः कुञ्जरयामतुल्यो
विस्तारोऽस्य त्र्यंशहीनः स एव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हीनो भूयश्चात्मषष्ठांशकेन

शालाद्वारं प्रागुदक् च प्रशस्तम् ॥

भूयः पुनः आत्मनरूयंशस्य षष्ठांशेन विस्तारः । एवं च द्वारमुपरि सूक्ष्ममधो भागे महच्च संपन्नं भवति ।

बन्धनार्थं वृक्षानाह—

चन्दनार्जुनशिरीषमधूका

देवदारुसरलार्जुनशालाः ।

रोहिणीखदिरचम्पकशाकाः

स्यंदनश्च सकदंबविशोकः ॥

शीताः शिवाश्च द्विपबन्धनार्थ-

मेते द्रुमाः पुष्टिकरा द्विपानाम् ।

स्तंभार्थमन्येऽपि हि सारवन्तः

कार्याः प्रशस्ता गुणसंप्रयुक्ताः ॥

तथा—

पूर्वाभिमुखो निबध्यते यः

क्षिप्रं स करोति विक्रमम् ।

राज्ञः समरेष्वनिर्जितो

दीर्घं चायुरवाप्नुयाद्गजः ॥

उदङ्मुखो बन्धमुपैति नागो

योऽर्थस्य वृद्धिं स करोति भर्तुः ।

प्राप्नोति पुष्टिं चिरजीवितां च

संग्रामकालेष्वपराजयं च । इति ॥

अन्यदिङ्मुखेऽनिष्टमाह—

दक्षिणदिग्वदनस्य च बन्धो

जीवितनाशकरो द्विरदः स्यात् ।

पश्चान्मुखो बन्धमवाप्य नागो

नित्यं भवेद्रोगनिपीडिताङ्गः ॥

नाशं च वित्तस्य करोति राज्ञ-

स्तस्मात्स याम्यापरदिग्विवर्ज्यः । इति ।

बन्धस्तंभमान(?)माह—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दिश्यैशान्यां बन्धनार्थं द्विपानां
स्तंभो राज्ञः श्रेयसे दन्तिनश्च । इति ।

अन्यदिश्यनिष्टम् । तत्परिमाणमाह—

ज्येष्ठो दशोच्चो नव मध्यमश्च
स्तंभोष्टहस्तः कथितः कनीयान् ।
सर्वे निखाताश्चतुरश्च हस्ता
मानाधिकोनाश्च शिवाय न स्युः ॥

गजानां मदजनकान्यौषधानि तु हस्तिचिकित्सायां द्रष्टव्यानीति नेह प्रपञ्चितानि ।

इति सपरिकरगजनिरूपणम् ।

अथाश्वलक्षणमुक्तं योगयात्रायाम्—

दीर्घग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्रताल्वोष्ठजिह्वः
सूक्ष्मत्वक्केशवालः सुशफगतिमुखो ह्रस्वकर्णौष्ठपुच्छः ।
जंघाजानूरुवृत्तः समसितदशनश्चारुसंस्थानरूपो
वाजी सर्वाङ्गशुद्धो भवति नरपतेः शत्रुनाशाय नित्यम् ॥

कूटं ललाटोर्ध्वभागः । त्रिकं कटिप्रदेशः । केशाः शरीरस्थिता बाला ग्रीवापुच्छगताः गोबलीवर्दन्यायेन पृथग्ग्रहणम् । जंघायां जानुनि वृत्तः मण्डलाकारः । समा निम्नोन्नतत्वरहिताः । सिताः श्वेताः ।

इष्टानिष्टमाह—

उत्सर्गान्न शुभदमासनापरस्थं
वामे च ज्वलनमतोऽपरत्र शस्तम् ।
सर्वांगज्वलनमवृद्धिदं हयानां
द्वैवर्षे दहनकणाश्च धूपनं च ॥
अन्तःपुरं नाशमुपैति मेढ्रे
कोशः क्षयं यात्युदरे प्रदीप्ते ।
भूपस्य पायौ च पराजयः स्या-
द्वक्त्रोत्तमाङ्गज्वलने जयश्च ॥
स्कंधासनांसज्वलनं जयाय
वधाय पादज्वलनं प्रदिष्टम् ।
ललाटवक्षोक्षिभुजे च धूमः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पराभवाय ज्वलनं जयाय ॥
प्रद्वेषो यवसांभसां प्रपतनं स्वेदो निमित्ताद्विना
कंपो वा वदनाच्च रक्तपतनं धूमस्य वा संभवः ।
अस्वप्नश्च विरोधतो निशि दिवा निद्रालसध्यानता
सादोऽधोमुखता विचेष्टितमिदं नष्टं स्मृतं वाजिनाम् ॥

हेषितपरीक्षामाह मिहिरः—

क्रौञ्चवद्रिपुवधाय हेषितं
ग्रीवया त्वबलया च सोन्मुखम् ।
स्निग्धमुच्चमनुनादि हृष्टव-
द्ग्रासरुद्धवदनैश्च वाजिभिः ॥
पूर्णपात्रदधिविप्रदेवता
गन्धपुष्पफलकाञ्चनादि वा ।
द्रव्यमिष्टमथवा परं भवे-
द्धेषतां यदि समीपतो जयः ॥
वामैश्च पादैरभिताडयन्तो
महीं प्रवासाय भवन्ति भर्तुः ।
संध्यांसुदीप्तामवलोकयन्तो
हेषन्ति चेद्बन्धुपराजयाय ॥
आरोहति क्षितिपतौ विनयोपपन्नो
यात्रानुगोऽन्यतुरगं प्रतिहेषितं च ।
वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं
योऽश्वः स भर्तुरचिरात्प्रकरोति लक्ष्मीम् ॥
मुहुर्मुहुर्मूत्रशकृत्करोति
न ताड्यमानोऽप्यनुलोमयायी ।
अकार्यभीतोऽश्रुविलोचनश्च
शिवं न भर्तुस्तुरगोऽभिधत्ते ॥

रथपतिलक्षणं लोकत एव ज्ञेयम् ।

इत्यश्वादिलक्षणम् ।

अथाभियोज्यनृपाः योगयात्रायाम्—

शब्दायन्ते मुहुरपि शिवा गर्दभध्वानतुल्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्यक्तस्नेहाः परिजनसुहृद्वाहनोपस्करेषु ।
कष्टं को नः शरणमिति वा वादिनो यस्य सैन्ये
विद्विष्टा वा प्रचुरपुरुषाः सोभियोज्यो नृपेण ।।
कापोतकोलूकमधूनि यस्य
समाश्रयन्ते ध्वजचामराणि ।
छत्रायुधादीनि च सोऽभियोज्यो
यस्याथवानाहततूर्यशब्दः ।।
प्रतीपगत्वं सरितामिषोश्च
शोषोऽथवाऽशोष्यजलाशयानाम् ।
अवारिदेशे सलिलप्रवृत्ति-
रब्बैकृतं चाप्सु तरेच्छिला वा ।।
भंगपातचलनान्यनिमित्तं
रोदनानि च सुरप्रतिमानाम् ।
अग्निरूपमनलेन विनाशः
निश्चलानि च यदा प्रचलन्ति ।।
प्रसूतिवैकृत्यमकालपुष्पा-
ण्यरण्यसत्वस्य पुरप्रवेशः ।
प्रदोषकाले कृकवाकुशब्दा
हिमागमे चान्यभृतप्रलापः ।।

अन्यभृत्कोकिलः ।

दीर्घं दीनं संहताः सारमेयाः
क्रोशन्त्युच्चैर्नित्यमेवानृतौ च ।
हन्युर्योषा योषितो निर्घृणाश्च
श्वेतः काको नक्तमिन्द्रायुधं च ।।

अनृतौ शरत्कालादन्यत्र । अनृताविनीन्द्रायुधेऽप्यन्वेति ।

अहा(?)तिरिक्तः पवनोऽतिचण्डो
गन्धर्वसंज्ञस्य भवेत्पुरस्य ।
व्यक्तिर्भवेच्चाहनि तारकाणां
नक्तं च तारागणसंप्रणाशः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं निमित्तानि यदा भवन्ति
तदाभियोज्याः क्षितिपेन देशाः ।

नीतिसारे—

भेदं कुर्वीत यत्नेन मन्त्र्यमात्यपुरोधसाम् ।
तेषु भिन्नेषु भेदे हि युवराजे तथोर्जिते ॥
अमात्यो युवराजश्च भुजावेतौ महीपतेः ।
मन्त्री नेत्रे हि भिन्नेऽस्मिन्नेकस्मिन्नपि तद्विधः ॥
सर्वावस्थं हि मेधावी न कुलीनं विकारयेत् ।
तत्रोपजापः कर्तव्यो यः कोपानुग्रहक्षमः ॥
आगतान्पूजयेत्स्वामी निजांश्च परिसांत्वयेत् ।
भेदं कुर्वीत मतिमान्निगृहीतो बलीयसा ॥
दंडेन हि समाहन्याद्भित्वारेः संहतं बलम् ।
भिन्नं हि तत्काष्ठमिव जन्तुजग्धं विशीर्यते ॥
इति भेदं नृपः कृत्वा ततो यायाद्रिपोः पुरम् । इति ॥

एवं सामदानभयादिना भेदं कृत्वेत्यर्थः ।

अथ दूतप्रेषणमाह कामन्दकः—

यातव्याय प्रहिनुयाद्दूतं दूत्याभिमानिनम् ।

तं विशिनष्टि—

प्रगल्भः स्मृतिमान्वाग्मी शास्त्रे चास्त्रे च निष्ठितः ।
अभ्यासकर्माभिरतो दूतो भवितुमर्हति ॥

तद्वैविध्यमाह—

निसृष्टार्थो मितार्थश्च तथा शासनवाहकः ।

तत्र योऽशिक्षितमेव देशकालोचितं यथायोग्यमन्यस्याग्रे वदति स निसृष्टार्थः । यथा पाण्डवानां दूतो वासुदेवः । यावत्संदिष्टवक्ता मितार्थः । शासनहारः प्रसिद्धः ।

दूतं प्रत्याह—

नाविज्ञातः पुरे शत्रोः प्रविशेच्च न संसदि ।
कालमीक्षेत कार्यार्थमनुज्ञातश्च निष्पतेत् ॥

निष्पतेदुपविशेत् ।

सारवत्तां च राष्ट्रस्य दुर्गं तद्गुप्तिमेव च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

छिद्रं शत्रोर्विजानीयात्कोशमित्रबलानि च ॥
उद्यतेष्वपि शस्त्रेषु यथोक्तं शासनं वदेत् ।
रागापरागौ जानीयात्प्रकृतीनां च भर्तरि ॥
फलेन नाम्ना द्रव्येण कर्मणा च महीयसा ।
कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि ॥
तीर्थाश्रमपुरस्थानैः शास्त्रविज्ञानहेतुना ।
उपात्तव्यञ्जनोपेतैः स्वचरैः सह संवदेत् ॥
प्रतापं कुलमैश्वर्यं त्यागमुत्थानसौष्ठवम् ।
अक्षुद्रतां च दाक्ष्यं च भर्तुः सर्वत्र कीर्तयेत् ॥
सहेतानिष्टवचनं कामं क्रोधं च वर्जयेत् ।
वैतसीमाश्रयेद्वृत्तिं नान्यवृक्षाश्रितां सदा ॥
नान्यं शपेन्न भावं स्वं वदेद्विद्यात्परस्य च ।
भावमन्तर्गतं गुप्तं सुप्तो मत्तश्च भाषते ॥
तस्मादेकः स्वपेन्नित्यं स्त्रीमध्ये च विवर्जयेत् ।
राष्ट्राटव्यंतपालानां आत्मसात्करणं तथा ॥
युद्धापसारभूज्ञानं दूतकर्मेति कथ्यते ।
दूतेनैव नरेन्द्रस्तु कुर्वीतारिविमर्षणम् ॥
स्वपक्षे च विजानीयात्परदूतविचेष्टितम् ।

इदं कर्म निसृष्टार्थस्यैव ।

चरा उक्ता नीतिसारे—

तपस्विलिङ्गिनो धूर्ता पण्यशिल्पोपजीविनः ॥
चराश्चरेयुः परितः पिबतो जगतां मनः ।
निर्गच्छेयुर्विशेयुश्च सर्ववार्त्ताविदोऽन्वहम् ॥
सूक्ष्मसूत्रं हि चारेण पश्येद्विविधचेष्टितम् ।
स्वपन्नपि हि जागर्त्ति चारचक्षुर्महीपतिः ॥
विवस्वानिव तेजोभिर्नभस्वानिव चेष्टितैः ।
राजा चरैर्जगत् कृत्स्नं व्याप्नुयाल्लोकसंमतैः ॥
एतैर्ज्ञेयास्तु संचाराः सर्वे नान्योन्यवेदिनः ।
प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधः स्मृतः ॥
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूत इष्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा—

जडमूकान्धबधिरछद्मानः पण्डकास्तथा ॥
किराता वामनाः कुब्जास्तद्विधा ये च कारवः।
भिक्षुकाश्चारणा दास्यो नानाकार्यकलाविदः ॥
अन्तःपुरगतां वार्तां आहरेयुरलक्षिताः।
छत्रव्यजनभृंगारयानवाहनधारिणाम् ॥
महामात्रा बहिर्वार्त्तां विंद्युरन्ये च संगताः।
सूदा व्यञ्जनकर्त्तारः कल्पकाः सूचिकास्तथा ॥
प्रसाधका भोजकाश्च गात्रसंवाहका अपि।
जलतांबूलकुसुमगन्धभूषणदायकाः ॥
कर्तव्या वशगा ह्येते ये चान्ये न्यासवर्तिनः।

इति दूतचारप्रपञ्चः ॥

अथ प्रयाणे योधस्वरूपमाह मिहिरः—

शूरकृतास्त्रमहाकुलजाताः
स्वामिहिता बलिनः कृतयज्ञाः।
दृष्टगुणा बहुबान्धवमित्रा
नागकरोरुभुजाः कठिनाङ्गाः ॥
व्याघ्रमृगेश्वरगोवृषनादाः
श्येनदृशः शुकसन्निभनासाः।
केकरजिह्मनिमीलितनेत्राः
पुण्यकृतां समरेषु सहायाः ॥
देशगुणैः प्रथिताश्च पुरोगा-
स्ते बहवो गुणलक्षणलक्ष्याः।
काकभृतो भ्रुकुटीकृतवक्त्रा
धर्मभृतो विविधायुधहस्ताः ॥

अथ प्रयाणे विशेषो योगयात्रायाम्—

अन्तःपुराद्वा स्वनिवेशनाद्वा
सिंहासनादग्निपरिस्तराद्वा।
कुर्यान्नरेन्द्रः प्रथमं प्रयाणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विप्रैः शताग्रैः कृतमङ्गलाशीः ॥
द्विजो विष्णुक्रमाद्रूपं मन्त्रेणानेन दापयेत् ।
इदं विष्णुर्विचक्रम इति पादं समुद्धरेत् ॥
अमुकस्य वधाय दक्षिणं क्षितिपो न्यसेत् ।
मङ्गलानि ततः पश्यन्स्पृशन् शृण्वन् नृपो व्रजेत् ॥

अथ दर्शनशकुनं वराहमिहिरः—

वाचः शुभाः सारसचाषबर्हिणः
कादंबहंसाश्च सजीवजीवकाः ।
काकश्च पंकाक्तवराहपृष्ठगो
श्रीवृक्षवालव्यजनानि चन्दनम् ॥
दधिमधुघृतरोचनाकुमारी-
ध्वजकनकांबुजभद्रपीठसिंहाः ।
सितवृषकुसुमांबराणि मीन-
द्विजगणिकाभजनाश्च(?)चारुवेषाः ॥
ज्वलितशिखिफलाक्षतेक्षुभक्ष्य-
द्विरदमृदंकुशचामरायुधानि ।
मरकतकुरुविन्दपद्मरागाः
स्फटिकमणिप्रमुखाश्च रत्नभेदाः ॥
स्वयमथ रचितान्ययत्नतो वा
पथि यदि कथितानि भवन्ति मङ्गलानि ।
स जयति सकलां ततो धरित्रीं
ग्रहणदृगालभनश्रुतैरुपास्याम् ॥

इदं मङ्गलं ग्राह्यं द्रष्टव्यं स्प्रष्टव्यं श्रोतव्यं चेत्यर्थः ।

अनिष्टफलान्युक्तानि तेनैव—

कार्पासौषधकृष्णधान्यलवणक्षीबास्थितैलं वशा
पंकांगारगुडाहिचर्मशकृतः केशायतं व्याधिताः ॥
वान्तोन्मत्तजडेन्धनास्तृणतुषक्षुत्क्षामतक्रारयो
मुण्डाभ्यक्तविमुक्तकेशपतिताः काषायिणश्चाऽशुभाः ॥

यानदिने क्षौराभ्यङ्गवर्जनं तु ज्योतिःशास्त्रे ज्ञेयम् । एवं मङ्गलामङ्गलभिन्नदर्शने नाऽनिष्टं नापीष्टलाभ इति ज्ञेयम् ।

CC-0. Nepal Sanskrit Academy; Kathmandu Collection

देशविशेषे विशेषमाह्—

छुछुंदरी शूकरिका शिवा च
श्यामारलापिंगलिकान्यपुष्टा ।
वामाः प्रशस्ता गृहगोधिका च
पुंसंज्ञका ये च पतत्रिणश्च ॥

तथा—

श्येनो रुरुः पूर्णकुटः कपिश्च
श्रीकर्णछिक्कारकपिप्पिकाजाः ।
स्त्रीसंज्ञिता ये च शिखिद्विपौ च
याने हिता दक्षिणभागसंस्थाः ॥
आस्फोटिताक्ष्वेडितशंखतूर्य-
पुण्याहवेदध्वनिगीतशब्दाः ।
वामाः प्रयाणे शुभदा नराणा-
माक्रन्दितं दक्षिणतः परेषाम् ॥

आस्फोटितं मल्लयुद्धम् आक्ष्वेडितं मुखशब्दः

भारद्वाज्यजबर्हिचाषनकुलाः संकीर्तनादर्शना-
त्क्रोशन्तश्च शुभप्रदा न सरटो दृष्टः शिवाय क्वचित् ।
गोधाशूकरजाहकाहिशशकाः पापारुतालोकने
धन्यं कीर्तनसृक्षवानरफलं तद्व्यत्ययाच्छोभनम् ॥

नकुलस्य मृगस्य पक्षिणां
वामो दक्षिणभागसेचनम् ।
शुभदं श्वशृगालयोरिदं
व्यत्ययेन फलदं प्रशस्यते ॥
चाषो नकुलश्च वामगौ
दिवसार्द्धात्परतः शुभप्रदौ ।
मृगवच्च वनेषु कुक्कुराः
शतपत्रोऽस्तमये च दक्षिणः ॥

क्वचिदपवादमाह—

निरुपहतमनोज्ञवृक्षसंस्थाः
शुचिरुचिरावनिसस्यसंस्थिताश्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुभतिथिदिवसर्क्षलग्नकाले-
ष्वशुभफलोऽपि शुभप्रदः प्रदिष्टः ॥
प्रभग्नशुष्कद्रुमकण्टकेषु
श्मशानभस्मास्थितुषाकुलेषु ।
प्राकारशून्यालयदुर्दशेषु
सौम्योऽपि पापः शकुनः प्रकल्प्यः ॥

तथा—

द्वंद्वार्तरोगार्दितभीतमत्त-
वैरार्तयुद्धामिषकांक्षिणश्च ।
सीमान्तनद्यन्तरिताश्च सर्वे
न चिन्तनीयाः सदसत्फलेषु ॥

इति प्राणिशकुनः ।

अथाऽप्राणिनः । स एव—

रिक्तोऽनुकूलः कलशो जलार्थ-
मभ्युद्यतः सिद्धिकरः प्रयाणे ।
विद्यार्थिनां चौर्यसमुत्थितानां
वणिक्क्रियाभ्युद्यमिनामतीव ॥

विशेषमाह—

यानं धुरेण रहितं बृहता(?)च कन्या
गर्भेण चातिमहता पुरतः स्थिता स्त्री ।
आगच्छ तिष्ठ विश गच्छसि वा किमर्थं
शब्दः स्थिरश्च गमनं प्रतिषेधयन्ति ॥

क्षुते आह—

सर्वत्र पापक्षुतमुद्दिशन्ति
गोस्तु क्षुतं मृत्युकरं यियासोः ।
मार्जाररावः स्खलनं च यातु-
र्वस्त्रस्य भङ्गश्च न शोभनाय ॥

तथा—

द्रव्याणि शुक्लानि तुरङ्गमश्च
पूर्वेण याम्येन शवं च मांसम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पश्चात्कुमारी दधि चातिशस्तं
सौम्येन गोब्राह्मणसाधवश्च ॥

तथा—

काकः शुभो दक्षिणतश्च तेषा-
मन्येषु देशेषु विपर्ययेण ॥

पूर्वदेशे दक्षिणः काकः शुभः । अन्यस्मिन्वाम इत्यर्थः ।

तथा—

क्रोशादूर्ध्वं शकुनविरुतं निष्फलं प्राहुरेके
तत्रानिष्टे प्रथमशकुने मानयेत्पञ्च षट् च ।
विघ्नो यामान्नृपतिरशुभे षोडशे वा द्वितीये
प्रत्यागच्छेत्स्वभवनमिति यद्यनिष्टस्तृतीयः ॥

प्रयाणे प्रथमं यत्राऽशकुनं जातं तत्रैव स्थित्वा एकादशयामानतिवाहयेत् । पुनः प्रस्थाने यद्यशकुनं ततः षोडश । ततोऽप्यशकुने गृहे आगमनम् । एवं शकुनानि ग्रहबलादीनि वीक्ष्य राजा स्वयं यायात् । स्वस्य ग्रहाद्यानुकूल्याभावे तद्वन्तं यशस्विनममात्यं जयार्थं प्रेषयेत् ।

यथोक्तं योगयात्रायाम्—

शत्रोर्वधाय सचिवं शुभदैवयुक्त-
माज्ञापयेन्नृपतिरात्मनि दैवहीने । इति ॥

ग्रहाद्यानुकूल्यं ज्योतिःशास्त्रादवगन्तव्यम् ।

अथ स्कन्धावारस्थलम् ॥

नीतिसारे—

यायाद्वैरिपुराभ्याशे भूभागे साधुसंमते ।
स्कन्धावारविशेषज्ञः स्कन्धावारं निवेशयेत् ॥
भूमिप्रदेशे सामर्थ्यादगारमुपकल्पयेत् ।
गुप्तं स्वच्छं पुराकारं महाद्विपसमावृतम् ॥
पार्ष्णिग्राहेण शुद्धं च रथपत्तिसमावृतम् ।
तन्मध्ये मानसाल्हादि महन्मौलं बलावृतम् ॥
अन्तःकोशग्रहोपेतं कारयेद्राजमन्दिरम् ।
मौलभूतश्रेणिसुहृद्द्विषिधाटविकं बलम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजहर्म्यं समावृत्य क्रमेण विनिवेशयेत् ।
अंते च गणिनः शूरान् लुब्धकान् दुष्टकर्मणः ॥
पर्याप्तवेतनानाप्तान्मंडले विनिवेशयेत् ।
हस्तिनो लब्धनामानस्तुरङ्गास्तु मनोजवाः ॥
गृहोपकण्ठे नृपतेर्वसेयुः स्वाप्तरक्षिताः ।
युद्धयोग्यो महामन्त्री सन्नद्धः साध्वधिष्ठितः ॥
तिष्ठेन्नरपतेर्द्वारि वेगवांश्च तुरङ्गमः ।
निशि तान्यो बहिर्गच्छेद्गच्छेच्चेद्वारि वारितः ।
सज्जोपकरणं तिष्ठेत्सर्वः कार्योन्मुखो जनः ॥

तथा—

बहिश्च खातान्सञ्छन्नान् तृणैरुपरि संवृतान् ।
परसैन्यविघातार्थं सर्वां भूमिं विनाशयेत् ॥
क्वचित्कण्टकशाखाभिः क्वचित्कीलैरयोमुखैः ।
दूषयेत्परितो भूमिं प्रच्छदप्रवरैरपि ॥
निगूढक्षुपपाषाणस्थाणुवल्मीकनिह्नुताम् ।

उत्तममध्यमभेदास्तत्रैव—

यस्मिन्देशे यथाकालं सैन्यव्यायामभूमयः ।
परस्य विपरीताश्च स्मृतो देशः स उत्तमः ॥
आत्मनश्च परेषां च तुल्यव्यायामभूमयः ।
यत्र मध्यम उद्दिष्टो देशः शास्त्रार्थचिन्तकैः ॥
अरातिसैन्यव्यायामसुपर्याप्तमहीतलः ।
आत्मनो विपरीतश्च स वै देशोऽधमः स्मृतः ॥

स्कन्धावारं विशिनष्टि कामन्दकः—

दिव्यान्तरिक्षैरुत्पातैः पार्थिवैश्चाप्यदूषितः ।
नीचैः प्रवृत्तपवनो भृंगालीततमंगलः ॥
हृष्टपुष्टजनः साधुः सुगन्धिज्वलिताननः ।
इत्यादिलक्षणोपेतः स्कन्धावारः प्रशस्यते ॥
शस्ते तस्मिन्द्विषो भंगो ज्ञेयोऽन्यस्मिन्विपर्ययः ।

शकुनाद्युपेते जयोऽशकुनाद्युपेते भङ्ग इत्यर्थः ।

सेनापतिरुक्तो नीतिसारे—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुलोद्गतं जानपदं मन्त्रज्ञं मंत्रिसंमतम् ।
दण्डनीतेः प्रयोक्तारमध्येतारं च यत्नतः ॥
प्रभावोत्साहसंपन्नमाजीव्यमनुजीविनाम् ।
नित्याकारणवैराणामकर्तारमनाविलम् ॥
श्रुतानुवन्धिकर्माणमल्पामित्रं बहुश्रुतम् ।
गजाश्वरथचर्यासु शिक्षितं त्यागिनं सहम् ॥
युद्धभूमिविभागज्ञं सिंहवद्दृढविक्रमम् ।
अदीर्घसूत्रं निस्तंद्रममर्षणमनुद्धतम् ॥
हस्त्यश्वरथशस्त्राणां सम्यग्लक्षणवेदिनम् ।
देशभाषास्वभावज्ञं लिपिज्ञं सुदृढं स्मृतम् ॥
निशाप्रचारकुशलं कुशलज्ञाननिश्चितम् ।
दिग्देशमार्गविज्ञानसंपन्नं तद्रसेवितम ॥
क्षुत्पिपासाश्रमत्रासशीतवातोष्णवृष्टिभिः ।
आनाहितभयग्लानिं शत्रुपक्षभयावहम् ॥
भेत्तारं परसैन्यानां दुःसाध्याहितनिश्चयम् ।
भग्नानां च स्वसैन्यानामवष्टंभस्य कारकम् ॥
चरदूतप्रचारज्ञं महारंभफलोपमम् ।
शश्वत्संसिद्धकर्माणं सिद्धिकर्मनिषेवितम् ॥
इत्यादिलक्षणोपेतं कुर्वीत ध्वजिनीपतिम् ।

तस्य कृत्यमुक्तम्—

ध्वजिनीं च सदोद्युक्तः स गोपायेद्दिवानिशम् ।
नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत् ॥
सेनापतिस्तत्र तत्र गच्छेद्व्यूहीकृतैर्बलैः ।

व्यूहस्तु मकरश्येनसूचीशकटवज्रसर्वतोभद्रभेदात्षोढा ।
तेषां विनियोग उक्तो महाभारते—

यायाद्व्यूहेन महता मकरेण पुरोभये ।
श्येनेनोभयपक्षेण सूच्या वा धीरचक्रया ॥
पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञितम् ।

अन्ये च गरुडादयो व्यूहभेदा नोक्ताः । तेषामेष्वेवान्तर्भावात् ।

सर्वतः सर्वतोभद्रं भये व्यूहं प्रकल्पयेत् ।

रचनोक्ता नीतिसारे—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नायकः पुरतो यायात्प्रवीरपुरुषावृतः ।
मध्ये कलत्रं कोशश्च स्वामी फल्गु च यद्धनम् ॥
नायकः सेनापतिः । फल्गु अन्नादि तद्रक्षणीयमित्यर्थः ।
पार्श्वयोरुभयोरश्वा वाजिनां पार्श्वयो रथाः ।
रथानां पार्श्वयोर्नागा नागानां चाटवीबलम् ॥
पश्चात्सेनापतिः सर्वं पुरस्कृत्य कृती बलम् ।
यायात्सन्नद्धसैन्यौघैः खिन्नांश्चाश्वासयन् जनान् ॥
पूर्वं सेनापतेरग्रे यानमुक्तम्, अधुना पश्चाद्यानम् । अतो ज्ञायते अग्रे याता पश्चाद्याता चेति सेनापतिद्वयमिति ।
इति सेनापतिव्यूहनिरूपणम् ॥

अथ कूटयुद्धेन शत्रुमारणसमय उक्तो नीतिसारे—
दीर्घाध्वनि परिश्रान्तं क्षुत्पिपासाहितश्रमम् ।
व्याधिदुर्भिक्षमरकैः पीडितं दस्युविद्रुतम् ॥
घोराग्निभयवित्रस्तं वृष्टिवातसमाहतम् ।
पंकपांसुजलस्कन्धव्यस्तं श्वासातुरं तथा ॥
प्रसुप्तं भोजने व्यग्रमभूमिष्ठमसंस्थितम् ।
एवमादिषु जातेषु व्यसनेन समाकुलम् ॥
स्वसैन्यं साधु रक्षेत परसैन्यं च घातयेत् ।
विशिष्टो देशकालाभ्यां युक्तः प्रकृतिभिर्बलैः ॥
कुर्यात्प्रकाशयुद्धं च कूटयुद्धं विपर्यये ॥
कूटयुद्धं नाम विषाक्तशस्त्रादिना घातनं लोके प्रसिद्धम् ।
किंचिदुक्तं नीतिसारे—
पुरस्ताद्विषमे देशे पश्चाद्धन्यात्तु वेगवान् ।
जितमेवेत्यविश्वस्तं हन्याच्छत्रुं व्यपाश्रितः ॥
विलोभ्यापि परानीकमप्रमत्तो विनाशयेत् ।
अवस्करप्रायाद्रात्रौ (?) प्रजागरकृतश्रमम् ॥
दिवा सुप्तं समाहन्यान्निद्राव्याकुलसैनिकम् ।
प्रातःसंगवसन्नद्धमपराह्णे विनाशयेत् ॥
निशि विस्रंभसंसुप्तं तत्सौप्तिकविधानवित् ।
इत्येवं कूटयुद्धेन हन्याच्छत्रून् लघूत्थितः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वदन्ति सत्रमित्यादि सत्रवत्स प्रकीर्तितः ।
अरिनाशो महीपानां नयशास्त्रविशारदः ॥
साधु प्रमत्तं व्यवसायवर्ती
येन प्रकारेण परं निहन्यात् ।
चरैः समावेदिततत्प्रचारः
शङ्केत तेनैव ततोऽप्रमत्तः ॥
नियतमिति निहन्यात्कूटयुद्धेषु शत्रुं
नहि तिरयति धर्मं छद्मना शत्रुनाशः ।
अचकितमिव सुप्तं पाण्डवानामनीकं
निशि सुनिशितशस्त्रो द्रोणसूनुर्जघान ॥

अत्र ब्राह्मणवर्जं हन्यात् । ब्राह्मणं तु स्वस्य वधार्थमायान्तं निवारयेत् । यदा निवारणमपि कर्तुमशक्तस्तदा हन्यादेव ।

यथाह मनुः—
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥
नाततायिवधे दोषो हन्तुर्भवति कश्चन । इति ॥

कात्यायनोऽपि—
आततायिनमायान्तमपि वेदान्तगं रणे ।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् । इति ॥

अतो जिघांसत एव विप्रस्य मारणं न सुप्तादेः । अत्र विज्ञानेश्वरः-मनुवाक्ये वाशब्दात्कात्यायनवाक्येऽप्यपिशब्दान्न ब्राह्मणवधे तात्पर्यम् । किंत्वेतादृशो ब्राह्मणोऽपि वध्यः किमुतान्य इतिकैमुतिकन्यायेनैतादृशान्यवधपरमित्याह । वस्तुतस्तु स्ववधोद्यतो ब्राह्मणोपि वध्य एव । पूर्वोक्तवचनयोः स्वार्थत्यागेऽसाधारणमानाभावात् । गालवस्तु अहनने दोषमाह—
उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम् ।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत् । इति ॥

आत्मघाती भवेदित्यर्थः ।

बृहस्पतिरपि—
स्वाध्यायिनं कुले जातं यो हन्यादाततायिनम् ।
अहत्वा भ्रूणहा स स्यान्न हत्वा भ्रूणहा भवेदिति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वत एवात्मानं गोपायेदितिश्रुतिरपि । अतः स्ववधार्थमागच्छन् ब्राह्मणो वध्यः । परवधार्थं गच्छन्स्वयं न वध्य इति तात्पर्यम् । एतत्परमेव बार्हस्पत्यम्—

आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतम् ।
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेदिति ।

एवमेव चन्द्रिकाशयः । यत्तु धृष्टद्युम्नस्य द्रोणवधे कुत्सनं कृतं न तद्ब्राह्मणवधनिमित्तमेव किं तु न्यस्तशस्त्रवधनिमित्तं, तादृशस्य ब्राह्मणस्य वधेऽन्यापेक्षया दोषातिशयात् ।

प्रजापीडनमुक्तं भारते—

उपरुंधन्ति राजानो भूतानि विविधानि च ।
त एव विजयं प्राप्य वर्द्धयन्ति पुनः प्रजाः ॥

तथा—तावल्लुण्ठेत्पीडयेच्च शत्रोः प्रकृतयः स्वयम् ।
वशे जाते पुनस्तासु पितृवद्वृत्तिमाचरेत् ॥

अथ धर्मरणमाह मनुः—

समोत्तमाधमै राजा त्वाहूतः पालयन् प्रजाः ।
न निवर्तेत संग्रामात्क्षत्रधर्ममनुस्मरन् ॥

तथा—आहवेषु मिथोऽन्योन्यं जिघांसंतो महीक्षितः ।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥

योधोपदेशः ।

योधान्प्रत्युपदेश उक्तो वराहमिहिरेण—

अभिजनयुता यूयं शौर्यं जनाः कथयन्ति वो
धनुषि परशौ शक्त्यां चक्रे तथैव कृतश्रमाः ।
मयि च भवतामस्ति स्नेहः कथं न जयो मम
द्विरदतुरगं स्यादाक्रान्तं भवद्भिरिदं यदा ॥

तथा पुराणोपदेशैश्च तान्प्रवर्तयेत् । तथाहि—ज्योतिष्टोमादियज्ञैः स्वर्गाद्याप्तिस्तत्र च ज्ञानाद्यनेकं साधनं महत्कष्टायाससाध्यम् । तथोपासनायां पञ्चाग्न्यादितपस्सु च क्लेशादिकं स्पष्टमेव । योगोऽपि वायुनिरोधनाहारनिद्राव्यायामनिरोधनादिना दुःसाध्य एव । सर्वत्र च कीर्तने कृते पुण्यक्षयः । अतः सर्वापेक्षया रणमरणमेव स्वल्पायाससाध्यं साधीयः । तत्र हि पापिनामपि स्वर्गः किमुतान्यस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदुक्तं योगयात्रायाम्—

द्वैपायनेन मुनिना मनुना च धर्मा
युद्धेषु ये निगदिता विदितास्तु ते वः ।
स्वाम्यर्थगोद्विजहिते त्यजतां शरीरं
लोका भवन्ति सुलभा विपुलं यशश्च ॥
तपस्विभिर्या सुचिरेण लभ्यते
प्रयत्नतः सत्रिभिरिज्यया च या ।
व्रजन्ति तामाशु गतिं मनस्विनो
रणाश्वमेधे पशुतामुपागताः ॥
स्वर्गस्य मार्गा बहवः प्रदिष्टा-
स्ते कृच्छ्रसाध्याः कुटिलाः सविघ्नाः ।
निमेषमात्रेण महाफलोऽय-
मृजुश्च पन्थाः समरे व्यसुत्वम् । इत्यपि ॥

तथा—

संरक्ष्यमाणमपि नाशमुपैत्यवश्य-
मेतच्छरीरमपहाय सुहृत्सुतार्थान् ।
तत्किं वरं प्रलुठतः सुहृशां समक्षं
किं निघ्नतः परबलं भृकुटीमुखस्य ॥
हा तात मातेति च वेदनार्तः
किरन् शकृन्मूत्रकफानुलिप्तः ।
वरं मृतः किं भवने किमाजौ
संदष्टदन्तच्छदभीमवक्त्रः ॥

तथा—

यस्य तपो न जनाः कथयन्ति
नो मरणं समरे विजयं वा ।
न श्रुतदानमहाधनता वा
तस्य भवः कृमिकीटसमानः ॥
लोकोऽशुभस्तिष्ठतु तावदन्यः
पराङ्मुखानां समरेषु पुंसां ।
पत्न्योऽपि तेषां न ह्रिया मुखानि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरस्सखीनामवलोकयन्ति ॥
शत्रुसैन्यमवदार्य वर्त्ततां
यत्सुखं तु कथयामि तादृशम् ।
शृण्वतां स्वयशसोपपल्लवान्
दिग्वधूवदनकर्णपूरकान् ॥
निपतति शिरसि द्विपस्य सिंहः
स्वतनुशताधिकमांसराशिमूर्तेः ।
पिबति च तदसृङ्मदेष्टगन्धं
वदनगतांश्च शनैः प्रमृज्य मुक्तान् ॥

भारते इन्द्राम्बरीषसंवादे, इन्द्रो यज्ञत्वेन रणवर्णनं कृत्वा तन्मध्ये यो मृतस्तस्य फलमाह—

भर्त्तुरर्थे तु यः शूरो विक्रमेद्वाहिनीमुखे ।
भयान्न विनिवर्त्तेत तस्य लोका यथा मम ॥
यश्च नावेक्षते कंचित्सहायं विजये स्थितः ।
जीवग्राहं प्रगृह्णाति तस्य लोका यथा मम ॥
आहवे निहतं शूरैर्न शोचेत कदाचन ।
अशोच्यो हि हतः शूरः स्वर्गलोके महीयते ॥
न ह्यन्नं नोदकं तस्य न स्नानं नाप्यशौचकम् ।
हतस्य कर्त्तुमिच्छन्ति तस्य लोकान् शृणुष्व मे ॥
वराप्सरस्सहस्राणि शूरमायोधने हतम् ।
त्वरमाणाः प्रधावन्ति मम भर्त्ता भवेदिति ॥
एतत्तपश्च पुण्यं च धर्मश्चैव सनातनः ।
चत्वारश्चाश्रमास्तस्य यो युद्धे न पलायते ॥

तथा—

नहि शौर्यात्परं किंचित्त्रिषु लोकेषु विद्यते ।
शूरः सर्वं पालयति सर्वं शूरे प्रतिष्ठितम् ॥
चराणामचरा अन्नमदंष्ट्रा दंष्ट्रिणामपि ।
अपाणयः पाणिमतामन्नं शूरस्य कातराः ॥
समानपृष्ठोदरपाणिपादाः
पश्चाच्छूरं भीरवोऽनुव्रजन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अतो भयार्त्ताः प्रणिपत्य भूयः
कृत्वाञ्जलीनुपतिष्ठन्ति शूरान् ॥

योगयात्रायामपि—

रुचिमत्कुचबाहुपञ्जरे
हरिणाक्ष्यः प्रवरोरुपीडनम् ।
रमयन्ति विमानसंस्थिताः
सुरवध्वोऽतिमुदारिणार्चितान् ॥
एकतोऽस्य सुरसुन्दरीजनः
श्रीः प्रतीच्छति युयुत्सतोऽन्यतः ।
पाप्मना सह पलायते यशः-
श्चैकतः कुलकलंककारकम् ॥

तथा—

चित्रं किमस्मिन्वद साहसं वा
यत्स्वामिनोर्थे गणयन्ति नासून् ।
युद्धात्प्रणष्टो विदितोऽरिमध्ये
यद्वालिशस्तिष्ठति साहसं तत् ॥
न केवलं गात्रविभूषणानि
क्षतानि शूरस्य रणे कृतानि ।
यशस्तरोर्मूलकृषिक्षतानि
तान्येव वंशस्य विभूषणानि ॥

भंगे जाते प्रत्यावृत्तौ फलातिशयस्तत्रैव ।

भग्नेषु योधेष्ववपूर्य शस्त्रा-
ण्याजौ प्रवृत्ता व्यसवः कृता ये ।
ऊर्ध्वाननना वाजिकृताप्तलोका-
स्तेषां विमानान्यवलोकयन्ति ॥

अश्वमेधप्राप्तलोकेभ्योऽप्युत्तमं लोकं यान्तीत्यर्थः ।

यैरश्वमेधो विहितः फलं वा
देवैर्द्विजैर्वा श्रुतिशास्त्रकारैः ।
तैरेव भङ्गे प्रतिलोमगस्य
पदे पदे वाजिमखः प्रदिष्टः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संमूर्छितं संयुगसंप्रहारैः
पश्यंति सुप्तप्रतिबुद्धतुल्यम् ।
आत्मानमंकेषु सुरांगनानां
मंदाकिनीमारुतवीजितांगाः ॥

यत्तु पराशरवचनं—

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखं हतः । इति ॥

तत्र परिव्राज इव रणहतस्यापि मोक्ष इति केचिद्व्याचक्षते । युक्तं तु तमेव विदित्वातिमृत्युमेतीत्यादिभिः श्रुतिभिर्मोक्षं प्रति ज्ञानस्यैव साधनत्वावगमाद्रणस्य च ज्ञानसाधनत्वाभावेन ज्ञानानुत्पत्तेर्न मोक्ष इति । यत्तु वचनं न तदसाधारण्येन रणस्य मोक्षफलं ब्रवीति । योगयुक्तश्चेति पदं योगे जाते ज्ञानोत्पत्तेः प्राङ् मृतस्य ये लोकास्ते रणमृतस्य भवन्तीत्येतत्परत्वेनाप्युपपन्नं न रणमरणस्य मोक्षसाधनत्वं गमयति । योगस्य तु मुक्त्यहेतुत्वमेतेन योगः प्रत्युक्त इति सूत्रे निरूपितमुत्तरमीमांसायाम् । यस्तु काशीमरणेन मोक्ष इति तत्रापि न काशीमरणं साधनं किंतु ज्ञानमेव । ज्ञानं च विशिष्टगुरोः शिवस्योपदेशाच्छीघ्रमेव जायत इति । विस्तरस्तु विस्तरभिया नेह प्रतन्यत इति दिक् । भगवद्गीतायामपि श्रीभगवता युद्धमेव क्षत्रियस्योत्कृष्टमुक्तम्—

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ॥
धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते ।
यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ।
अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ।
अकीर्त्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ॥
संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते ।
भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ॥
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ।
अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ॥
निंदन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ॥
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः । इति ।

तथा विशेषो भारते—

गजो गजेन यातव्यस्तुरगेण तुरङ्गमः ।
रथिना च रथी योज्यः पत्तिना पत्तिरेव च ॥
यथायोग्यं तु संयोज्य घ्नन् धर्मेण न हीयते ।

एवमसंभवे प्रकार उक्तः कामन्दकेन—

अश्वस्य प्रतियोद्धारो भवन्ति पुरुषास्त्रयः ।
प्रतिकल्पास्तु पंचाश्वा विधेयाः कुञ्जरस्य च । इति ॥

पलायने दोषमाह मनुः—

यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः ।
यत्किंचिद्दुष्कृतं भर्त्तुस्तत्सर्वं प्रतिपद्यते ॥
यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम् ।
भर्ता तत्सर्वमादत्ते परावृत्तहतस्य च ॥

उपदेशो योगयात्रायाम्—

जीवतोऽपि निहतस्य वा रणे
धर्म एव हि नरस्य युध्यतः ।
निश्चयात्तु मरणं हि संगरे
नैव भीरुरजरामरः कचित् ॥
मानमात्रमवलंब्य युध्यते
कीटकोऽथ विहगोऽथवा पशुः ।
को हि नाम पुरुषस्त्यजेद्रणं
स्वर्गमानसुखकीर्तिवित्तदम् ॥

नारायणोऽपि—

यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमतोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम् । इति ॥

अवध्यानाह मनुः—

न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न मुक्तकेशमासीनं न तवास्मीति वादिनम् ॥
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् ।
नायुध्यमानं पश्यन्तं न परेण समागतम् ॥
न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ।

राजधर्मेषु—

वृद्धो बालो न हन्तव्यो नैव स्त्री नैव च द्विजः ।
तृणपूर्णमुखश्चैव तवास्मीति च यो वदेत् ॥

शंखः—

न पानीयं पिबन्तं न भुञ्जानं नोपानहौ प्रमुञ्चन्तं नावर्माणं सवर्मा न स्त्रियं न करेणुं न वाजिनं न सारथिं न दूतं न ब्राह्मणं न राजानमराजा हन्यात् ।

रणे च दानमुक्तं नीतिसारे—

प्रत्यग्रे कर्मणि कृते श्लाघमानः कृतादरः ।
योधेभ्यस्तु ततो दद्यात्को हि दातुर्न युध्यते ॥

तथा—

रूप्यं हेम च कुप्यं यो यो यज्जयति तस्य तत् ।
दद्याद्रूस्त्वनुरूपं च हृष्टो योधान्प्रहर्षयन् । इति ॥

इति वीरोत्साहगर्भे धर्मयुद्धम् ।

एवं राजा परराष्ट्रं विजित्य ता एव प्रजाः पितृवत्पालयेत् । तच्चोक्तं पूर्वमेव । अथ वीरोत्साहगर्भो निन्दापरिहारः भारते—युधिष्ठिरप्रश्नो भीष्मं प्रति ।

क्षत्रधर्मान्न पापीयान् धर्मोऽस्ति भरतर्षभ ।
अभियाने च युद्धे च राजा हन्ति महाजनम् ॥
अथ स्म कर्मणा केन लोकान् जयति पार्थिवः ।
विद्वन् जिज्ञासमानाय प्रब्रूहि भरतर्षभ ॥
निग्रहेण च पापानां साध्वनुग्रहणेन च ।
यज्ञैर्दानैश्च राजानो भवन्ति शुचयोऽमलाः ॥
उपरुन्धन्ति राजानो भूतानि विजयार्थिनः ।
त एव विजयं प्राप्य वर्द्धयन्ति पुनः प्रजाः ॥
अपविध्यति पापानि दानयज्ञतपोबलैः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनुग्रहेण भूतानां पुण्यमेषां विवर्द्धते ॥
एवं शस्त्राणि मुञ्चन्तो घ्नन्ति वध्याननेकधा ।
तस्यैषा निष्कृतिर्दृष्टा भूतानां भावनं पुनः ॥
यो भूतानि धनाज्ज्यात्या वधात्क्लेशाच्च रक्षति ।
दस्युभ्यः प्राणदानाच्च स धर्मः सुखदो विराट् ॥
स सर्वयज्ञैरीजानो राजाथाभयदक्षिणः ।
अनुभूयेह भद्राणि प्राप्नोतीन्द्रसलोकताम् ॥
ब्राह्मणार्थे समुत्पन्ने योऽभिनिःसृत्य युद्ध्यते ।
आत्मानं यूथमुत्सृज्य स यज्ञोऽनन्तदक्षिणः ॥
आभीतो विकिरन् शत्रून् प्रतिगृह्णन् शरांस्तथा ।
न तस्मात्त्रिदशाः श्रेयो भुवि पश्यन्ति किंचन ॥
यस्य यावन्ति शस्त्राणि तनुं भिन्दन्ति संयुगे ।
तावतः सोऽश्नुते लोकान् सर्वान्कामदुघोऽक्षयान् ॥
यदस्य रुधिरं गात्रादाहवेषु प्रवर्तते ।
सह तेनैव रक्तेन सर्वपापैः प्रमुच्यते ॥
यानि दुःखानि सहते व्रणानामभिपातने ।
न तपोभिस्ततो भूय इति धर्मविदो विदुः ॥

तथा—

पतत्यभिमुखः शूरः पराद्भीतः पलायते ।
आस्थाय स्वर्ग्यमध्वानं सहायान्विषमे त्यजेत् ॥
मा स्म तांस्तादृशांस्तात भरिष्ठाः पुरुषाधमान् ।
ये सहायान् रणे हित्वा स्वस्तिमन्तो गृहान्ययुः ॥
अस्वस्ति तस्मै कुर्वन्ति देवा इन्द्रपुरोगमाः ।
त्यागेन यः सहायानां स्वप्राणांस्त्रातुमिच्छति ॥
संहन्युः काष्ठलोष्टैर्वा दहेयुर्वा कटाग्निना ।
पशुवन्मारयेयुर्वा क्षत्रिया ये ह्यनीदृशाः ॥

अनीदृशः अभीरवः शूरा इत्यर्थः ।

अधर्मः क्षत्रियस्यैष यच्छय्यामरणं भवेत् ।
विसृजन् श्लेष्मपित्तानि कृपणं परिदेवयन् ॥
अविक्षतेन देहेन प्रलयं योऽधिगच्छति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षत्रियो नास्य तत्कर्म प्रशंसन्ति पुराविदः ॥
न गृहे मरणं तात क्षत्रियाणां प्रवर्त्तते ।
शौंडीराणामशौण्डीरमधर्मंकृपणं च यत् ॥
रणेषु कदनं कृत्वा ज्ञातिभिः परिवारितः ।
तीक्ष्णैः शस्त्रैः सुनिर्भिन्नः क्षत्रियो वधमर्हति ॥
शूरो हि सत्वमन्युभ्यामाविद्धो युद्ध्यते भृशम् ।
कृन्त्यमानानि गात्राणि परैर्नैवावबुध्यते ॥
स संख्ये निधनं प्राप्य प्रशस्तं लोकपूजितम् ।
स्वधर्मं विपुलं प्राप्य शक्रस्यैति सलोकताम् ॥
यत्र तत्र हतः शूरः शत्रुभिः परिवारितः ।
अक्षयान् लभते लोकान् यदि दैन्यं न भाषते ॥
इति वीरोत्साहगर्भो विचिकित्सापरिहारः ॥

अथ क्रीडा ।

नृपादृतां राजनीतिमुक्त्वा शंकरनन्दनः ।
श्रीनीलकंठो वदति क्रीडां बुद्धिबलाश्रिताम् ॥

पटे फले वा भुवि वाथकार्यं
प्रागग्ररेवानवकं तथैव ।
उदग्दिगग्रं नवकं समान-
मेवं चतुःषष्टिपदं हि तत्स्यात् ॥
कोणेष्वथो हंसपदैस्तदंकये-
त्तत्पंक्तिगं दिक्षु पदद्वयं द्वयम् ।
मध्ये चतुष्कं च समंक्य तत्र
स्थाप्यं च सांग्रामिकसैन्ययुग्मम् ॥

अन्त्येष्वष्टपदेषु मध्यपदयो राजा च मन्त्री तयो-
रुष्ट्रौ पार्श्वगतौ तयोरपि तथा वाहौ तयोर्दन्तिनौ ।
तल्लग्नाधरपंक्तिगा वसुमिता स्थाप्या बुधैः पत्तयः
स्थाप्यं चाप्यपरत्र सैन्यमुभयं चैवं रणायोद्यतम् ॥
राजा दिक्षु विदिक्षु चाष्टपदगो मन्त्री विदिङ्मात्रग-
श्चैकैकं करभस्तु शृंखलतया मध्यं विहायापरम् ।
वाजी दिक्पदतो विदिग्गतपदेष्वष्टस्वथो कुञ्जरः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पंक्तौ सर्वपदेष्ववक्रगतिमान् पत्तिः पुरो गच्छति ॥
एकैकं विनिहन्ति वक्रगमनेनैवं पदे चान्तिमे
प्राप्तो मन्त्रविदेष जायत इतौ वृत्तः पदे पूर्वगे ।
अन्ते हंसपदे स चेदुपगतस्तत्रैव मन्त्री भवे-
न्नो पूर्वं परिवर्तनेन कथिता भाषेह सम्यक्क्रमात् ॥
अनावृत्तिपरावृत्तिभिदा क्रीडा द्विधेष्यते ।
पदतत्स्थाप्यभेदेन तत्राप्याद्या द्विधा मता ॥
सचिवाग्रगतौ ततः पदाती
सचिवौ तावनु तत्र चालनीयौ ।
पदयुग्ममितीह संप्रदायः
पदगोऽन्योऽपि परैः प्रवर्त्यतेऽत्र ॥
गतागते हयोष्ट्रयोर्नचान्तरा निवर्तकः ।
पुरःस्थिता हयादयो गजस्य ते निवर्तकाः ॥
मन्त्रिणः पृष्ठकोणस्थौ स्थाप्यौ पत्ती स्थिरावुभौ ।
तथा क्रमेलकस्यापि पश्चाच्छृंखलगावुभौ ॥
व्यूहद्वयमिदं चक्रव्यूहव्रतपरमारणे ।
द्वित्रिप्रकारोद्यमनं दुरोखशः प्रकीर्त्तितः ॥
परस्य राज्ञोऽभिमुखं द्विपं संस्थाप्य मध्यतः ।
स्वीयान्यस्यापसरणात्काटीशः स प्रकीर्त्तितः ॥
न सांग्रामिकः कोऽपि संस्थापनीयो
विना संश्रयं संश्रयो नीच इष्टः ।
न वै संश्रयो भूपतेरन्य इष्टो
न वा मारणं भूपतेस्त्विष्टमेव ॥
संरोधनं राजजयोमतोऽत्र
तदर्द्धतैकाकितया प्रदिष्टा ।
सा चेच्चतुःषष्टिमिता क्रमेण
स्युर्यस्य सोऽप्यत्र पराजितः स्यात् ॥
राजा विरुद्धेशयुतो न चेत्स्यात्
न चास्य पक्षे गतिमान् द्वितीयः ।
प्रमापयेत्सोऽथ विपक्षपक्षे

CC-0. Nepal Sanskrit Academy Kathmandu Collection

समीपगं स्वस्य निरोधनक्षमम्
निरुध्यमानस्य नृपस्य सार्थे
शिष्येत यद्येकतरस्तदैव ।
तत्क्रीडकः संगणयेत्प्रतीपां-
स्तेष्वात्मनो द्वावथ तान् द्विनिघ्नान् ॥
कृत्वा तदंकान् गणयेत्प्रतीप-
क्रीडाश्चतुःषष्टिमिताः स हीनः ।
तन्मध्य एवास्य पराजयः स्या-
त्ततोऽधिकोऽसौ विपरीतकश्च ॥

अथाश्वस्य चतुःषष्टिपदगमनप्रकारः सिंहलद्वीपराज्ञः श्लोकौ—

सिंनहीवनिवप्रज्ञापाकंश्रीदेमनोविल
वाहलश्मद्दुनंतंतिमेपेतुणपधाजिकु ।
श्रीसिंहणमहीपालमेधाविकुलकं वहु
पदेन वाजिनो ज्ञानं चलनं प्रतिवेश्मनि ॥

अत्र चतुःषष्टिपदं मंडलं कृत्वा तत्र नैर्ऋतीमारभ्य सिंनहीत्यादि-श्लोकाक्षराणि वाचयन्नश्वं नयेत् । इति ।

अथ तातचरणानां श्लोकौ—

निनाशंत्रिशमेजल्हकछद्मभिपणाश्वसा ।
एविरोतिषभूरानिवाप्रवेहाष्टिहंयगे ॥
नारायणाव्हरामेशभूजनिः प्रतिसद्मनि ।
निनाय शंकरो वाहं स्वगेहात्सत्रिषष्टिमित् ॥

अथ मामकः प्रकारः—

आद्यं वस्वेकमष्टद्विशिखिविधुपदं वह्निजं नंदिसंज्ञं
नंदैकं पञ्चयुग्मं शरहरनयनं खाशुगं त्रित्रियुक्तम् ।
अश्वद्विव्योमचन्द्रं युगमितमुडुराडक्षिषट्त्रित्रिपञ्चो-
पांत्येवस्वब्धिभूमिज्वलनमुदधिकुद्वैरदं त्रिद्विषष्ठम् ॥
षट्चन्द्रं नेत्रयुग्मं मुनिजमुदधिदङ्नंदवह्न्याशुगाब्धि
व्योमर्त्वब्धीषु वेत्थं पुनरयनयदितो वाजिनं नीलकंठः ।

इति श्रीमीमांसकशङ्करभट्टात्मजभट्टनीलकण्ठकृते भगवद्भास्करे नीतिमयूखः समाप्तः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Acade Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection